L
1947

Acc No. 5[illegible]

M93

॥ श्रीमते रामानुजाय नमः ॥

सिद्धित्रय विषय सूची

१—मङ्गलपुरस्सरं स्वप्रतिपाद्योपोद्घातः १—२।
२—जीवात्मविषये तत्प्रमाणेषु मोक्षस्वरूपे च विप्रतिपत्तिः ३—४।
३—परात्मविषये विविधविप्रतिपत्तिप्रदर्शनम् ५—७।
४—स्वाभिमनमुपपाद्य देहात्मवादोपपादनम् ८—११।
५—देहात्मवादनिराकरणम् १२—१५।
६—इन्द्रियाणां मनसश्चानात्मस्वरूपत्वोपपादनम् १६—१६।
७—प्राणानामात्मभावमाशङ्क्यानात्मत्वोपपादनम् १७—१८।
८—बौद्धमतेन बौद्धगन्धिमतेन च सविन्या-
स्यात्मत्वप्रतिपादनम् १९—१९।
९—संविदोनित्यत्वादि, सुरेश्वरमतं च २०—२४।
१०—आत्मनःसविशेषस्वरूपत्वोपपादनम् २५—२९।
११—आत्मनोऽहमर्थस्वरूपत्वव्यवस्थापनम् ३०—३१।
१२—बन्धमोक्षयोरुभयोरप्यात्मनो ज्ञातृरूपत्वव्यवस्थापनम् ३२—३५।
१३—विज्ञानवाद्यादिमतमुदस्यात्मनः सविशेषज्ञानावच्छिन्न-
स्वरूपत्वव्यवस्थापनम् ३६—३६।
१४—आत्मनोनैयायिद्यभिमतानुमानमात्रसिद्धत्वनिराकरणम् ३७—३९
१५—संघातपरार्थत्वादिकं केवलमात्मसिद्धौ न क्रमते
इत्युपपादनम् ४०—४०।
१६—आत्मनः श्रुतिप्रमाणकत्वव्यवस्थापनम् ४१—४२।
१७—आत्मनः प्रात्यक्षिकत्वमाशङ्क्य तन्निराकरणम् ४३—४३।
१८—मीमांसकैकदेशिमतमाशङ्क्य तन्निराकरणम् ४४—४४।
१९—ज्ञानानुयेयतावादिमीमांसकमतक्षेपः ४५—४५।
२०—वेदितृ तथैवात्मसिद्धिरिति पक्षक्षेपः ४६—४६।
२१—आत्मने भासमानस्वभावतया संविदः प्रकाशस्वभा-
वत्वव्यवस्थापनम् ४७—४८।
२२—चैतन्येवहलविरलत्वादिकल्पनानिराकरणम् ४९—५१।
२३—तमसा चैतन्यशक्तिप्रतिबन्धपक्षक्षेपः ५२—५२।
२४—आगन्तुकचैतन्यवादमवधूयात्मनोनित्यचैतन्यस्वरू-
पत्वव्यवस्थापनम्। ५३—५८।
२५—आत्मनोधर्मभूतज्ञानस्य क्रियादिस्वरूपतां व्युदस्य
तस्यात्मधर्मत्वव्यवस्थापनम् ५९—६०।
२६—प्रसङ्गतः एकत्वद्वित्वादिस्वरूपनिरूपणम् ६१—६७।
२७—विषयेण ज्ञानसंबन्धोपपादनंज्ञानस्यचात्म-
नोनित्यधर्मत्वम् ६८—६८।
२८—सुगतमतोपपादनतन्निराकरणे ६९—७९।
२९—मीमांसकनैयायिकादिरीत्या ईश्वरसिद्धिमाशङ्क्य त-
न्निराकरणपूर्वकं सिद्धान्तव्यवस्थापनम् ८०—९६।

यद्यपि आत्मसिद्धीश्वरसिद्धिग्रन्थावपि बहुलाशुद्धिसंमिश्रौ तथाऽपि कथकथमपि सुयोजौ संवित्सिद्धिः सर्वथा प्रभ्रष्टपाठेति नाकिंचिदिह सूचयितुं शक्यमित्युपेक्ष्यते.

॥ श्रीमते रामानुजाय नमः ॥

शुद्धा शुद्धि पत्रम् ।

पृष्ठ	पंक्ति	अशुद्धम्	शुद्धम्
५	५	तेयेति	येतेति
८	१३	वादतः	बाधतः
११	१	भेदस्य	भेदस्य
"	६	सांह	संह
"	११	तेष	तेषां
१२	१२	सुप	मुप
१३	१३	नत्व	नत्वं
"	९	तदी	तदि
"	४	प्रतिज्ञायते	प्रज्ञायते प्रतिज्ञायते
१६	५	निमित्त	निमित्ते
१७	११	सवित्स	संविदःस
१८	१२	केनाचि	केनचित्
२१	९	तस्यो	तस्यास्यो
२२	१०	भावा	भावो
२३	५	विदद	विदः
"	११	कुसुमस्य	कुसुमस्या
३१	९	शदिति	शवदिति
४२	६	क्षत्व	क्षत्वे
४३	"	निरङ्कुशस्य	निरङ्कुशस्य
४४	५	रिवानः	रिवान
"	१७	मानस्वै	मानस्यै
५०	१	सक्ति	सक्तिः
६१	५	निष्क्रमणः	निष्क्रमण
६४	११	क्रियावत्वं	क्रियावत्वं
७२	"	ज्ञातृक्षे	ज्ञातृज्ञे
७३	२	द्यणुक	अद्यणुक
७५	"	मित्त	निमित्त
८०	९	ईश्व	ईश्वर
८३	७	मन	मनु
८५	८	रण	रम्भण
"	३	निःसीमा	निःसीम
८७	१०	काश	काल
८८	"	निधू	निर्धू
		शया	शाया
		पना	पनाना

M93.

॥ श्रीः ॥
श्रियै नमः ।
श्रीधराय नमः ।
श्रीमते रामानुजाय नमः ।

सिद्धित्रये ।

आत्मसिद्धिः ।

प्रकृतिपुरुषकालव्यक्तमुक्ता यदिच्छा-
मनुविदधति नित्यं नित्यसिद्धैरनेकैः ।
स्वपरिचरणभोगैः श्रीमति प्रीयमाणे
भवतु मम परस्मिन् पूरुषे भक्तिभूमा ॥ १ ॥
विरुद्धमतयो ऽनेकास्सन्त्यात्मपरमात्मनोः ।
अतस्तत्परिशुद्ध्यर्थमात्मसिद्धिर्विधीयते ॥ २ ॥

सम्मतं हि सर्वसमयेषु आत्मज्ञानं निश्रेयसहेतुरिति, श्रूयते च* पृथगात्मानं प्रेरितारञ्च मत्वा जुष्टस्तत-

---

* अभावस्य सिद्धान्ते भावस्वभावानतिरेकाद् अन्यमात्मानमित्य-नभिधाय पृथगात्मानमित्युक्तं, ततश्च पार्थक्यस्यानङ्गीकारपक्षेऽपि भावस्वभावविश्रान्तवैलक्षण्योपलक्षित एवात्म-परमात्मनोर्विशेष इह पृथगात्मानमित्यभिधीयते । एवमेव तु जीवपदेनानिर्दिश्यात्मपदेन निर्देशे स्वरूपविश्रान्तविशेषलाभोऽन्यथा तु जीव प्राणधारण इत्यनु-स्मरणात् प्राणधारणोपाधिकृत एव विशेष इति भ्रमः स्यात् । प्रेरि-तारमित्युक्त्या गायत्र्यर्थानुस्मृतिमुखेन नियम्यनियामकस्व-स्वाभि-भावादिलक्षणविविधविशेषावच्छिन्नव्यक्तिरनुस्मार्यते अत एव त्वि-ह पराभिमतवाक्यजन्यवाक्यार्थज्ञानमात्रलक्षणज्ञानव्युदसिसिषया मत्वेति भक्त्यपरपर्यायं ज्ञानमभिधीयते अत एव त्वत्र जुष्ट इत्यनेन नवधा भक्तिलक्षणोपायपुरस्कारं श्रुतिः क्रोडीचकार ।

मत्वेति च क्त्वाप्रत्ययेन जोषणाव्यवहितपूर्ववर्त्तिताया ज्ञाने ज्ञा-

स्तेनामृतत्वमेति, आत्मानं चेद्विजानीयात्, तरति शोकमात्मवित्, ब्रह्मविदाप्नोति परम्, इत्यादिः परापरात्मतत्त्वज्ञानस्यापवर्गसाधनत्वं प्रतिपादयन् वेदान्तवाक्यगणः, तत्रास्मिन्नात्मनि परस्मिँश्चानेकविधा विप्रतिपत्तयस्तीर्थकराणां, तद्यथा आत्मविषये तावद् देहमेव केचिदात्मानमाचक्षते, इन्द्रियाण्यन्ये, मन इत्यन्ये, प्राणमपरे, अध्यस्तज्ञातृभावमनहंकारं बोधमात्रमितरे, देहेन्द्रियमनःप्राणबोधविलक्षणमाकाशादिवदचित्स्वभावमागन्तुकबोधसुखदुःखाद्यसाधारणगुणा-

---

नाव्यवहितोत्तरवर्तिताया जोषणे वा मतभेदेनाभिधानमात्रादेव भक्त्युपेयत्वममृतत्वे सिध्यति तथाऽपि क्वचिदुदासीनयोरानन्तर्यबोधनात् क्वचिदानन्तर्तस्य प्रयोज्यत्वमात्रपर्यवसायितया च भक्तेरनन्तरङ्गोपायताभ्रान्तिनिरसनाय तत इत्युक्तं, ततश्च स्थलविशेषे भुक्त्वा व्रजतीत्यादौ गण्डूषाचमनादिव्यवधानस्य सोढव्यत्वेन नात्यन्ताव्यवधानसिद्धिरिति ततःपदेन जुष्टपदार्थतावच्छेदकजोषणहेतुकत्वममृतत्वप्राप्तौ बोध्यते इति भक्तेरन्तरङ्गोपायतासिद्धिः । अथवा ततःपदेन फलमत उपपत्तेरिति ब्रह्मसूत्ररीत्या मोक्षस्य परमेश्वरप्रसादरूपत्वं बोध्यते । तेनेतिपदेन च जोषणहेतुकत्वं, तच्चासाधारण्येन इतरथा जुष्टोऽमृतत्वमेतीत्युक्त्यैव जोषणहेतुकत्वसिद्ध्या तेनेत्युक्तिरपार्थिकैव स्मात् । यथा हि धनवान्, सुखीत्यादौ विधेये उद्देश्यनावच्छेदकप्रयोज्यत्वं भासते तथेहापि जुष्टोऽमृतत्वमेतीत्येव अमृतत्वे जोषणप्रयोज्यत्वलाभे तेनेत्यनतिशायकमेव स्यादभिधानमिति वाक्यार्थमर्यादाविदां न परोक्षम् । एवं च जोषणासाधारणहेतुकत्वं मोक्षे लभ्यते इत्यनन्तरङ्गोपायतां भक्तेरास्थाय श्रुतिं कदर्थयन्तो भक्तेर्वा ज्ञानानात्मतां प्रतिपद्यमाना निरस्ताः । एवं च विशेषार्थवाक्यानुरोधेन सामान्यार्थवाक्यानामर्थस्य वक्तव्यत्वात् ज्ञानमात्रान्मोक्षमभिदधत्यः श्रुतयो भक्तिलक्षणज्ञानपरा इत्यवगन्तव्यं, न हि सामान्यानुरोधेन विशेषार्थो नीयेत विशेषार्थेन तु सामान्यार्थपर्यवसानकल्पनं युक्तमेव । अमुमेव विशेषमालोच्य सिद्धित्रयाचार्याणां पृथगात्मानमिति श्रुतिपुरस्करणमिति निगूढतत्त्वम् ।

धारमहङ्कारगोचरमपरे, अपरे तु बोधैकस्वभावमेव, स्वभाववलमिव स्फटिकमणिमुपधानविशेषापादितारुणिमगुणादिनिर्भासमन्तःकरणोपधानापादितरागद्वेषसुखदुःखाद्यशिवगुणनिर्भासमनुदितानस्तमितस्वरूपप्रकाशं स्वयंज्योतिषमिममभिदधति, अन्ये तु ज्ञानानन्दस्वभावम्, आश्रयानुकूल्यप्रतिलब्धानन्दसुखादिव्यपदेशबोधविशेष एवास्य स्वाभाविक इत्यन्ये, तथा अनुमानसमधिगम्यः, आगमैकवेद्यः, मानसप्रत्यक्षवेद्यः, ग्राहकतयैव सकलविषयवित्तिषु प्रत्यक्षोज्ञानस्वभावतयाऽनुदितानस्तमितस्वरूपप्रकाशः स्वयंज्योतिः, ईदृशोऽप्यागमानुमानयोगजप्रत्यक्षैः स्वेतरसकलवित्क्षणस्वाभाव्येन विशद-विशदतर-विशदतमतया अन्ततो यथावदपरोक्ष्यत इति, तथा परममहान्, अणुपरिमाणः, शरीरपरिमाणः, स्वतःपरिमाणरहितोऽपि व्याप्यवस्तुपरिमितिकृतपरिच्छेद इति, व्याप्तिरपि चैतन्यमात्रेण स्वरूपेण इति, तथा क्षणिकः यावच्छरीरोष्मस्थायी, आप्राकृतप्रलयावस्थायी, आमोक्षस्थायी कूटस्थो नित्य इति, सर्वशरीरेष्वेकः, प्रतिक्षेत्रं नानाभूत इति च, तथातथा प्रतिपद्यन्ते।

तथा परमात्मविषयेऽपि केचित्समस्तवस्तुसाक्षात्कारिणं सर्वशक्तिमीश्वरमेव नाभ्युपगच्छन्ति। अभ्युपगच्छन्तोऽप्येऽके प्रत्यस्तमितमितिमानमात्रमेयेश्वरेशितव्यादिभेदविकल्पकूटस्थविज्ञानैकरसमनाद्यविद्योपदर्शितवियदादिभेदावच्छिन्नज्ञानैश्वर्यादिमहिमविकल्पतया काल्पनिकमाचक्षते। अपरेतु यथोक्तस्वरूपमेव अविद्योपधानेन तद्गुणसारतया प्रकल्पितब्र-

ब्रह्मादिस्थावरपर्य्यन्तविविधजीवभेदं स्वाधीनविचित्रविवर्त्तस्वभावमायोपहिततया समासादितसार्वज्ञ्यादिसंपदमुपहितमिममभिदधति । तथाऽन्ये प्रकृष्टसत्त्वोपादाननिमित्तस्वतन्त्रप्रधानपरिणामविशेषमात्रनियमनिर्वाहितसर्वैश्वर्यमर्य्यादमाद्रियन्ते । अनुपहितमपि परिणामिनमपरे प्रतिपेदिरे । अपरिणामिनमपि स्वमायांशभूतविचित्रान्तःकरणदर्पणतलप्रतिबिम्बिततया प्रतिपन्नविश्व-तैजस-प्राज्ञभावं तमेकमेव चेतनमितरे रोचयन्ते । अन्ये तु स्वाधीनद्विविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदं स्वाभाविकनिरवधिकातिशयज्ञानबलैश्वर्य्यवीर्य्यशक्तितेजःप्रभृतिसकलकल्याणगुणमहार्णवं पुरुषविशेषमीश्वरमातिष्ठन्ते । तथा तद्विशेषेऽपि हरिहरविरिञ्चिभास्करात्मनाऽनभिमतत्तन्मूर्तिपरित्यागेन च चतुस्त्रिद्व्येकमूर्तितया विवदन्ते । मूर्तिविशेषविषयाश्च नित्यत्वानित्यत्वभौतिकत्वाभौतिकत्वस्वार्थपरार्थत्वादिवितर्काः प्रादुर्भवन्ति परिजनस्थानादिगोचराश्च, तथा प्रमाणतोऽपि आनुश्रविक एवेत्येके । आनुमानिकश्चेत्यन्ये । विशिष्टप्रत्यक्षसमधिगम्यश्चेत्यपरे । तथाऽऽत्मपरमात्मनोः संबन्धेऽपि अनाद्यविद्योपादानभेदास्पदोऽयमीश्वरशेषितव्यतादिरूपः संबन्धः परमार्थतस्त्वेकं तत्त्वमिति केचित् । व्यतिरेकाभावेऽप्यतिरिक्तो जीव इत्यन्ये । स्वतस्त्वैक्यमुपाधितो भेद इति विशिष्टस्वरूपभावेन भिन्नाभिन्नत्वमितरे । नानात्वे सत्येव अभेदो नामान्वयः अंशांशिभावलक्षणः, समवायः परतन्त्रतालक्षणः,

---

* श्रीश्च ते लक्ष्मीश्च पत्न्याविति पुरुषसूक्तोक्तमहापुरुषम् ।

शेषशेषित्वरूपः, स्वस्वामिभावः भृत्यस्वामिलक्षण इति च नानाविधा वादाः। तथा परमपुरुषार्थभूते ब्रह्मप्राप्तिलक्षणमोक्षेऽपि स्वरूपोच्छित्तिलक्षणः, अविद्यास्तमयलक्षणो निःशेषवैशेषिकात्मगुणोच्छेदलक्षणः कैवल्यरूपः तद्भावसाधर्म्यलक्षणः, तद्गुणसंक्रान्तिलक्षणः, तच्छायापत्तिलक्षणः, सांसिद्धिकानन्दादिस्वरूपाविर्भावलक्षणः, तद्गुणानुभवजनितनिरतिशयसुखसमुन्मेषोपनीतात्यन्तिकतत्किङ्करत्वलक्षण इति तथातया विवदन्ते। तत्साधनतोऽपि कर्मयोगलभ्यः, ज्ञानयोगलभ्यः, अन्यतरानुगृहीतान्यतरलभ्यः, उभयलभ्यः, उभयपरिकर्मितस्वान्तस्यैकान्तिकात्यन्तिकभक्तियोगलभ्य इति, तदेवमनवसितविशेषविमर्शकजनविमतिदर्शनात् तत्तत्प्रस्तसाधनबलाबलानवगमाच्च ततस्ततः सन्दिहानाः प्रेक्षावन्तो न तावत्परमपुरुषार्थाय घटेरन् यावदयमात्मा परमात्मा च स्वरूपतः प्रमाणतः संबन्धतः प्राप्तितः तत्साधनतश्च न निर्णीयेतेति तेयेति तत्प्रतिबोधाय इदमारभ्यते। यद्यपि भगवता बादरायणेन इदमर्थान्येव सूत्राणि प्रणीतानि, विस्तृतानि च तानि परिमितगम्भीरभाषिणा भाष्यकृता*, विस्तृतानि च तानि गम्भीरन्यायसागरभाषिणा भगवता †श्रीवत्साङ्क‡मिश्रेणापि तथापि आचार्य-टङ्क-भर्तृप्रपञ्च-

---

* द्रमिडाचार्येण।

†आचार्यमारभ्य भास्कराचार्यपर्यन्तमाचार्यनामानि तेषामवस्थितिकालक्रमेण तत्राचार्यो द्रमिडाचार्यः, टङ्को वार्त्तिककारश्च एतौ द्वौ श्रीसंप्रदायानुयायिनौ।

‡श्रीवत्साङ्कमिश्राअपि श्रीसंप्रदायानुयायिनः।

भर्तृप्रपञ्च-भर्तृमित्र-भर्तृहरि-ब्रह्मदत्ता निर्विशेषब्रह्मवादपक्षमाक्षिपतेति शङ्कराचार्योत्प्राचीना अपि तत्सयूथ्याः। अत एव बृह-

भर्तृमित्र-भर्तृहरि-ब्रह्मदत्त-शङ्कर-श्रीवत्साङ्क-भास्करादिविरचितसितासितविविधनिबन्धनश्रद्धाविप्रलब्धबुद्धयो न यथावदन्यथा च प्रतिपद्यन्त इति तत्प्रतिपत्तये च युक्तः प्रकरणप्रक्रमः, तत्र ।

देहेन्द्रियमनःप्राणधीभ्योऽन्योऽनन्यसाधनः ।
नित्यो व्यापी प्रतिक्षेत्रमात्मा भिन्नः स्वतःसुखी ।।

ननु देहमेवात्मानं प्रत्यक्षतः प्रतिपद्यामहे अहं जानामीति ज्ञाता ह्यात्मा अहमिति चकास्ति, देहश्चाहङ्कारगोचरः स्थूलोऽहं कृशोऽहमिति दर्शनात्, देहस्य हि स्थौल्यादियोगः अतस्तत्समानाधिकरण्यतया अयमहङ्कारःशरीरालम्बन इत्यवश्याश्रयणीयम्, इतरथा सकललौकिकपरीक्षकव्यवहारोपरोधश्च, न चायं लाक्षणिको व्यवहारः मुख्यवृत्तिभूमेः पृथगसिद्धत्वात्, न चानेकावयवयोगिशरीरालम्बनत्वे ज्ञानावभासस्य तदीयरूपावयवाद्यवभासेनान्वयिना भवितव्यं, येन तदन्वयाभावाज्जानामीति प्रत्ययः शरीरातिरिक्तमवगमयेत् बाह्येन्द्रियप्रत्यक्ष एव तथा नियमदर्शनात्, स्वान्तस्थान्तरगुणाधारतावभास एव सामर्थ्यनियमात् अनवष्टतावयवविशेषस्याप्यनेकावयवयोगिनो महिमगुणशालि-

---

दारण्यकभाष्ये भर्तृप्रपञ्चभाष्यात्स्वग्रन्थे विशेषमावेदयितुं शङ्कराचार्यैः (इयत्पग्रन्था वृत्तिरारभ्यते) इत्युक्तं भर्तृप्रपञ्चभाष्यस्य विस्तृतत्वादिति भावः । ब्रह्मदत्तस्याद्वैतवादेऽपि क्वचिच्छङ्करमताद्विशेषः ।

भास्करस्तु अद्वैतवाद्यपि शङ्करस्य सर्वथा मतं निराख्यदिति जानन्त्येव तद्विदः । अत्र विशिष्टाद्वैतमास्थायुकानां निर्विशेषाद्वैतं चाभ्युपगच्छतां परेषां चाचार्याणां संमिश्रच ऐकस्वर्याभिधानं तु तेषां कालक्रमाज्ज्ञानायेति समगरिष्महि ।

‡ एतेऽतिप्राचीनाः ।

नस्त्र्यणुकस्य प्रथमप्रत्यक्षाभ्युपगमात्, वायोश्च त्वगिन्द्रियेण स्पर्शाधिष्ठानमात्रतयोपलब्धदर्शनाच्च, देहव्यतिरिक्तात्मगोचरत्वेऽपि यथा तदीयगुणान्तराग्रहणं तथेहापि यथा तत्र बाह्यप्रत्यक्षगोचर एव संख्यापरिमाणादिग्रहणनियमः, एवं च प्रत्येकं परमाणुषु चैतन्यानुपलब्धेः तदभ्युपगमेच एकशरीर एवानेकसहस्रचेतनापातात्, अकारणगुणपूर्वकस्य कार्यद्रव्यवर्तिनो विशेषगुणस्यासम्भवान्न शरीरविशेषगुणश्चैतन्यम् अयावच्छरीरभावित्वाच्च इत्यादयोऽनुमानभेदाः प्रत्यक्षबाधितविषयतया न पराक्रमितुं क्षमन्ते। विशेषगुणत्वे च प्रतिषिध्यमाने देहगुणत्वाभ्युपगमप्रसङ्गश्च, अपि च इच्छानुविधायिक्रियत्वे इन्द्रियत्वादयः शरीरे दृश्यमानाः संप्रतिपन्नाचैतन्याद् घटादेरत्यन्तव्यावर्तमानाः शरीरमेव चेतनमवगमयन्ति क्रमुकफलताम्बूलदलावयवादिषु प्रत्येकमविद्यमानस्यापि रागस्येव अवयविनि संयोगविशेषाद् देहारम्भकपरमाणुसंश्लेषविशेषादेव देहे चैतन्यस्याप्याविर्भावो नानुपपन्नः, चर्वणजनितक्षतवहसंयोगसंपादितपाटलिमभिः परमाणुभिर्द्व्यणुकादिक्रमेण कारणपूर्व एव तत्र रागोदय इति चेन्न, प्रमाणाभावात्, अपि च सितासितादितन्तुषु प्रत्येकमविद्यमानमपि चित्ररूपं विशेषगुणं तदारब्धे पटे स्फुटमुपलभमानाः कथं कारणगुणपूर्वकत्वमुक्तगुणस्याध्यवस्येम। न चावयवरूपातिरेकेणावयविनि चित्रं नाम रूपान्तरं नास्त्येव अवयविनोऽवाक्षुषत्वप्रसङ्गात्-अवयवरूपैरेव तदुपपादने सर्वमेव कार्यद्रव्यं नीरूपमापद्येत अनुभवविरोधः, सर्वव्यवहारविरोधश्च, वि-

शेषगुणश्च काठिन्यं करकाद्व्यवर्ति अकारणगुणपूर्वकं दृश्यत इत्यनैकान्तश्च। न च संयोगविशेषः काठिन्यं तस्य द्विष्ठत्वात् अस्य तु करकाद्रव्यैकवर्त्तित्वात् स्पर्शविशेषतया पदार्थविद्भिरभ्युपगमाच्च, दृश्यस्य देहस्य कथं द्रष्टृत्वमिति चेत् को विरोधः, अयमेव यदेकस्यां क्रियायामेकस्य कर्मत्वं कर्तृत्वं च न घटत इति यद्वेवं व्यतिरेकवादे वा कथमात्मन्यहमिति प्रत्ययः रूपभेदादिति चेत् समानमिदं देहात्मवादेऽपि। अपि च परसमवायक्रियाफलभागि कर्म स्वसमवेतज्ञानफलभागिनः शरीरस्य कर्मत्वमेव नास्तीति न पर्य्यनुयोगावकाशः, अतो देह एवात्मेति वार्हस्पत्याः। तथा च पृथिव्यापस्तेजो वायुरिति तत्त्वानि तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवदिति सूत्रम्। मांधत:

अत्र प्रतिविधिर्देहो नात्मा प्रत्यक्षवाद्तः।
न खल्वहमिदंकारावेकस्यैकत्र वस्तुनि॥

अहं जानामीति प्रत्यग्वृत्तिरहमिति मतिः इदंकारगोचराच्छरीरान्निष्कृष्टमेव स्वविषयमुपस्थापयति घटादेरिव परावृत्तिरिदमिति शरीरविषयिणी च शेमुषी स्वविषयमहंकारगोचराद् विवेचयति यथाऽयं घट इति, इतरथा स्वपरविभागानुपपत्तेः। न चैकस्मिन्नेव रूपभेदादेवं प्रतीतिः, न हि देवदत्तो दण्डिनमात्मानं दण्ड्ययमिति प्रत्येति, अन्यच्च नियमितबहिरिन्द्रियवृत्तेरवहितमनसोऽहमिति स्वात्मानमवयवतः करचरणोदराद्यवयवा न भासन्ते स्वदीयेषु चावयविनि शरीरे अहमिति मतिगोचरे अभ्युपगम्यमाने अवश्यमवयवप्रतिभासेनाप्यन्वयिना भाव्यं, न ह्यस्ति संभवः

अवयवी स्यवीयान् प्रचकास्ति, अवयवास्तु न केचन प्रयन्ते इति। यत्तु द्व्यणुके व्यभिचार इति तन्न वातायनविवरहृश्यनिर्भागलसरेणुव्यतिरेकेण परमाणुस्वीकारे कारणाभावात्, प्रत्यक्षयोग्यावयवस्य तथा प्रतिभासनियमाद्वा न व्यभिचारः। न चावयविनि बहिरिन्द्रियग्राह्य एवायं नियम इत्युल्लेख्यं प्रमाणाभावात्, अन्तःकरणस्य च केवलस्यावयविनि वृत्त्यसंभवाच्च, वायोस्तु रूपाद्यभावात् केवलस्पर्शाधारतयोपलक्षः तत्रापि तादृशानेकावयवप्रतिभासोऽस्त्येव स्पृश्यमान इव घटादाविति न तेन व्यभिचारः। यत्तु स्थूलोऽहं कृशोऽहमिति शरीरे अहंप्रत्ययो दृश्यते इति तदपि पर्यालोचनीयं तत्रापि अन्तःशरीरमहङ्कारमेव किमपि वस्त्वहंकारो गोचरयति न पुनश्चाक्षुष इव देहप्रत्ययस्यौल्यबाल्यादियोगिदेहभानम्, अत एव ममेदं गृहमितिवन्ममेदं शरीरमिति भेदप्रतिभासो व्यवहारश्च, न ह्यसौ साक्षात्प्रतीतभेदनिमित्तः प्रतायमानः शिलापुत्रकशरीरव्यपदेशवदौपचारिको युक्त आश्रयितुं ममात्मेतिवत् तत्राप्यक्षज्ञस्य आत्मनि वृत्तेरैकार्थ्यादविवादाच्च युक्तं तथाऽश्रयणं, न चैवमत्र, अतो देहव्यतिरेकिणश्चेतनस्य प्रत्यक्षसिद्धत्वात् तत्संबन्धिनि लाक्षणिको देहे अहंशब्दप्रयोगः, बाह्यविषयेषु परस्परविलक्षणरूपपरिमाणसंख्यासंनिवेशग्रहणेन व्यतिरेकस्य स्फुटत्वात्, आत्मनि तादृशरूपान्तराग्रहणेन देहाभेदप्रतिभासभ्रमोऽविवेकिनाम्। यतश्चेच्छानुविधायिव्यापारोऽयमात्मा इच्छयैव हि संकल्पयति स्मरत्यप्यूहति च, शरीरमपि तदिच्छानु-

* प्रतीयमान इति पा०।

विधायिशयनासनोत्थानादिचेष्टमिति भवत्यभेदभ्रमः शुक्तिरजतादाविव, प्रणिहितमनसस्तु ज्ञाटतया सिद्ध्यन्त-महमाकारमर्थमनवयवमिदमिति परिस्फुरतः स्थूलादवयविनश्शरीरात् पृथक् अपरोक्षयन्त्येव । भवन्ति च जानामीति प्रत्ययः शरीरविषयो न भवति अर्थान्तरविषयो वाऽयम् अप्रकाशमानतदवयवप्रतिभासत्वाद् य एवं प्रकारः स तथा, यथा अयमिति प्रतिभासः, यच्छरीरविषयं न तत्तथा यथा उभयसंमतं शरीरज्ञानं तथा शरीरम् अहंप्रत्ययगोचरो न भवति इदमिति गृह्यमाणत्वाद् वाह्येन्द्रियग्राह्यत्वाद् वा घटादिवदिति । किंच

अपरार्थं स्वमात्मानमात्मार्थेऽन्यच्च जानतः ।
सङ्घातत्वात् परार्थेऽस्मिन् देहे कथमिवात्मधीः ॥

सर्वस्य वाह्याभ्यन्तरभोग्यवर्गस्य शब्दसुखादेरात्मार्थतां भोक्तुश्चात्मनोऽनन्यार्थतां सर्वस्य शेषितां प्रत्यक्षतः प्रतिपद्यामहे, न च शरीरमनन्यार्थं संघातत्वात्, संघाता हि सर्वे परार्था दृष्टाश्शयनासनरथाद्यः, न च संघाताः संहतशरीराद्यर्था दृश्यन्ते इत्यात्मनोऽपि संहतत्वमापद्यते इति वाच्यं तथा सति तस्यापि परार्थत्वप्रसङ्गात्, अपरार्थश्चायमात्मा प्रत्यक्षतः प्रकाशत इत्युक्तम् । योग्यानुलम्भवाधितं चात्मनि संघातत्वं, संघातान्तरार्थत्वे च तस्यापि तथा ततोऽन्यस्यापि तथेति न व्यवतिष्ठेत, न च व्यवस्थायां सत्यामव्यवस्था युक्ता, न च संघातस्य परार्थत्वे परस्य संहतत्वमपि प्रयोजकं भोक्तृतयैवात्मनस्स्वार्थसंघातं प्रति परत्वोपपत्तेः । व्याप्त्यनुपयोगिनोऽपि दृष्टान्तदृष्टधर्ममात्रस्यानुरोधेनानुमानमिच्छतः सर्वानुमानाच्छेदप्रसङ्गः ।

अस्फुटत्वेऽपि मेदस्य शरीरे तदसंभवात्।
तद्गुणान्तरवैधर्म्यादपि ज्ञानं न तद्गुणः॥

सर्व एव कार्य्यद्रव्यगतविशेषगुणः कारणगुणपूर्वक इति कथमतत्पूर्वकः शरीरे चैतन्यगुणः संभवेत्। यत्तु बार्हस्पत्यं वचनं पृथिव्यापस्तेजोवायुरिति तत्त्वानि तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवदिति तदनुपपन्नं शक्तेरविशेषगुणत्वेन तथोपपत्तेः, सर्वद्रव्येषु तत्तत्कार्यसमधिगम्यः तत्प्रतियोगिशक्त्याख्यो गुणः साधारणः नैवं चैतन्यं देहैकगुणत्वाभ्युपगमात् कार्य्यत्वे सत्येकविधप्रत्यक्षमिश्रतया च विशेषगुणत्वात्, द्रव्यान्तरसंयोगसमासादितमदशक्तिभिरकार्य्यभूतैः परमाणुभिर्निजगुणपुरस्कारेण स्वकार्य्यद्रव्येषु मदशक्त्युत्पादोऽपि नानुपपन्नः, ताम्बूलरागस्तु पूर्वद्रव्यावयवविभागानन्तरं द्रव्यान्तरसंयोगजनितरक्तिमगुणैः कारणैः क्रियते, दृश्यते हि तत्तावयवेष्वपि प्रत्येकं रक्तिमगुणः, न च शरीरावयवेषु प्रत्येकं चैतन्यगुणः प्रज्ञायते प्रतिज्ञायते वा, तदुपगमे च एकशरीर एवानेकचेतनापातात्, अङ्गाङ्गित्वाभावः प्रतिसंधानव्यवहारलोपश्च देवदत्तदृष्ट इव यज्ञदत्तादेः। यत्तु अकारणगुणपूर्वकं चित्ररूपं पटे इति तन्न नानारूपता हि चित्रता, सा च नानारूपैस्तन्तुभिः क्रियत इति किमनुपपन्नं, प्रत्येकमविद्यमानमपि तच्चित्ररूपं तन्तुषु सांहतेषु दृश्यत एव चित्रा इमे तन्तव इति, संभूय च तेषपटारम्भकत्वम्, एवं तत्कारणेष्वपि तदिति न क्वचिद् व्यभिचारः, न चैकरूपनियमाभावेन अवयविनोऽचाक्षुषत्वं महत्त्वैकार्थसमवायिना रूपवत्त्वेनैव चाक्षुषत्वसिद्धेः, अस्तु वा चित्रं नाम एको रूपविशेषः स तु रूपै-

रेव कारणगतैर्नानाविधैरारभ्यत श्रुति दृष्टं, न चैवमवयववर्त्तिभिरेव चैतन्यैरवयविनि शरीरे चैतन्यविशेषारम्भः चितितन्मात्रस्यैव तेष्वसंभवात् अतो न देहगुणश्चैतन्यम् । एतेन सुखाद्योऽपि शरीरगुणाः प्रत्युक्ताः । अपि च दृढ एव शरीरे विरोधिगुणापातमन्तरेण कुसुमविलेपनगन्ध इव निवर्तमानश्चैतन्यसुखादिर्न तद्गुणो भवितुमर्हति, न खलु तद्विशेषगुणा रूपादयस्तथा निवर्तन्ते आत्मनः परेषां च शरीरगुणाः प्रत्यक्षयोग्याः बाह्येन्द्रियग्राह्याश्च न च तथा ज्ञानादिरिति नासौ तद्गुणः । किंच ।

उत्पत्तिमत्त्वात्यारार्थ्यात् सन्निवेशविशेषतः ।
रूपादिमत्त्वाद्भूतत्वाद्देहो नात्मा घटादिवत् ॥
सच्छिद्रत्वाददेहित्वाद्देहत्वान्मृतदेहवत् ।
इत्यादिसाधनैर्न्याय्यैर्निषेध्या वर्ष्मणश्चितिः ॥

एवं प्रत्यक्षविरोधात् अन्वयमुखेन साध्यमुपस्थापयद्भिः उदीरितसाधनैरपहृतविषयतया इन्द्रियाश्रयत्वादिव्यतिरेका हेतवो न साध्यमुपस्थापयितुमीशते । सन्तु तर्हीन्द्रियाण्येवात्मा न च तानीदन्तया प्रथन्ते येन देहवदहङ्कारगोचराहन्धिक्रियेरन् । नापि तथोद्भूतरूपादिगुणानि स्थूलानि येन तत्प्रतिभास इव इन्द्रियगोचरत्वे अहंप्रत्ययस्य रूपावयवादिप्रतीतिः प्रसज्येत, तद्व्यापारफलं च ज्ञानं तद्वानियुक्तं स्नानाध्ययनादिफलवत् । अत एव सत्यतपाः दृष्टुश्चक्षुष इति,तन्न विकल्पासहत्वात् तथाहि किं प्रत्येकमिन्द्रियाणि चेतनानि संभूय वा यदि प्रत्येकमिन्द्रियान्तरदृष्टस्य इन्द्रियान्तरेण प्रतिसंधानं न स्यात्, अस्ति च तद् यमहमद्राक्षं तमहं स्पृशामीति, अत

एव न संभूयापि चेतनत्व, न हि पञ्चभिरिन्द्रियैस्संभूय एकं वस्त्वनुभूयते अनुसंधीयते वा, एकेन्द्रियविगमे च प्रायणप्रसङ्गश्च,इन्द्रियचैतन्ये च तत्तदिन्द्रियापाये तदीन्द्रियार्थस्मरणमपि न भवेत्, न च तद्व्यापारफलतया तत्समवायित्वं ज्ञानस्य, शस्त्रादिव्यापारजन्मनोऽपि पापादेः परसमवायित्वात्, अन्यथा च प्रष्टुः मृत्युप्रपत्तिं शरणागतपरित्यागस्य कृशंसतां च आलोच्य सत्यतप्रसक्तथा वचनम्। अस्तु तर्हि मन एव चेतनं तथा सति हि पूर्वोक्ता दोषाः परिहृता भवन्ति, तद्धि सर्वेन्द्रियाध्यक्षं प्रतिक्षायते च, उपपद्यते च इन्द्रियान्तरेण प्रतिसंधानं दर्शनानुसंधानाधारस्य मनस एकत्वात् तत्तन्द्रियापायेऽपि स्मरणमप्युपपद्यत एव मनसो नित्यत्वात्, तदपि न करणत्वात् चक्षुरादिवत् बाह्यान्तरसकलविषयसंवेदनकरणतया हि मनः प्रकल्प्यते बाह्येन्द्रियेषु यथायथं निजविषयसन्निकर्षभागिष्वपि यतो न युगपदेव सर्वे विषयाः प्रतीयन्ते अतोऽवगच्छामः अस्ति किंचिदपरमपि साधनं यत्साहाय्यकविरहान्न सर्वे प्रकाशन्ते कश्चिदेव एकः प्रतीयत इति, तथा सुखादिसंवेदनान्यपि करणवन्ति क्रियात्वात् संवेदनत्वाद्वा रूपादिज्ञानवदिति तदेवं ज्ञानकरणतयाऽवगतस्य मनसः कथमिव ज्ञाने कर्तृत्वं, स्वातन्त्र्यलक्षणं हि तत्, तच्च स्वच्छन्दानुरोधेन साध्यसिद्धानुगुणोपकरणसंपादनसामर्थ्यं स्वसमवेतमेव वा गुणान्तरं तन्वीकृत्य प्रवृत्तिः, करणत्वं तु पराधिष्ठानाधीनव्यापारतारूपपारतन्त्र्यनियतं साधकतमत्वमिति कथमिवैकत्र मनसि परस्परविरुद्धतदुभयधर्मसंबन्धं प्रतिपद्येमहि। अथ तदपि मनः करणान्तरेण स्मरणा-

दिषु कर्तृभावमनुभवति तथा सति संज्ञामात्रे विवादः, य एव हि चक्षुरादिभीरूपादीन् आन्तरकरणेन च सुखादींश्चेतयते स एवात्मा तस्मिन्नेव चेन्मनःसंज्ञा निवेश्यते कामं निवेश्यतां न नः किंचिद्दीनं, किंतु तथा सर्वलौकिकव्यवहारो बाध्येतेत्यलमनेन। आह किमिदं मनो नाम ननु उक्तमान्तरं ज्ञानकरणं द्रव्यमिति; किं पुनरस्य साधनं ननु उक्तं युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति, उक्तं नाम तथाऽपि कथं तत्त्वान्तरसिद्धिः कल्पयित्वाऽपि हि तद्युगपत्स्मरणानुत्पत्त्युपपत्तये अवश्यान्वेषणीयमेव निमित्तान्तरं, सन्ति हि युगपदस्य स्मर्तुर्नानार्थानुभवभाविताः संस्काराः। अथ च न सर्वे स्मर्यन्ते किंचिदेव कदाचित् स्मर्यते संस्कारोन्मेषहेतूपनिपातक्रमात्तथात्वमिति चेत् एवमपि प्रणिधानमालोद्बोधनीयसंस्कारस्य स्मृतियौगपद्यमापद्येत, यावदनुभूतसकलविषयमुन्मूर्षया सर्वतः प्रत्याहृतचेतसस्साधारण्येन प्रणिदधतोऽपि न सर्व एवार्थाः स्मृतिमधिरोहन्ति, यदि तु शुभाशुभरूपतया स्मरणानामदृष्टवशाद् व्यवस्थाक्रमः ज्ञानस्वाभाव्याद्वा आत्मनः तथा सति बहिरिन्द्रियेषु च यथायथं स्वविषयसंप्रयुक्तेषु तथैव युगपज्ज्ञानानुत्पत्तिरुपपद्यत इति कृतमिन्द्रियान्तरेण, स्यान्मतं कादाचित्कस्य सुखादेरात्मसमवायिनो बाह्यविषयादृष्टनिमित्तकारणस्यासमवायिकारणेन भाव्यम्, तच्च आत्ममनस्सन्निकर्ष इति मनोद्रव्यसिद्धिरिति तदसत् सुखदुःखादिपूर्वकालजन्मनः अभिमतानभिमतविषयसंपर्कजज्ञानस्यात्मसमवायिन एव असमवायिकारणत्वात् तस्य च विषयसंप्रयुक्तेन्द्रियसंप्रयोग-

एव आत्मसमवेतोऽसमवायिकारणं तद्धेतुरपीन्द्रियव्यापारः प्रयत्नमदृष्टं चात्मसमवेतमपेक्षमाणादात्मेन्द्रियसंन्निकर्षात् असमवायिकारणात् प्रयत्नस्य तु स्वपूर्वक्षणवर्तिकर्तव्यताज्ञानं प्रयत्न एव तदृष्टस्यापीति नात्मविशेषगुणानां बुद्धिसुखदुःखेच्छादीनाम समवायिकारणमपेक्षत्वापि द्रव्यान्तरपरिकल्पनं न्याय्यम्। यत्तु नित्यद्रव्यविशेषगुणस्य द्रव्यान्तरसंयोग एव असमवायिकारणं पार्थिवपरमाणुषु अग्निसंयोगादसमवायिकारणादूरोत्पत्तेरिति तदपि स्थवीयः,पार्थिवपरमाणुषु रूपादयोदहनसंयोगादिति कुतोऽवगतं कार्यद्रव्ये तथा दर्शनादिति चेत् इह वा तर्हि किं न दृश्यते इष्टानिष्टप्राप्त्यवगमादनन्तरं सुखादिर्जायत इति दृष्टकारणाव्यभिचारे हि कारणान्तरानुमानावसरः, न चेहास्ति व्यभिचारः अतः प्रसिद्धकारणभावेष्वेव यत्र कार्यसमवायः तत्समवायिकारणम् यत्तु तत्प्रत्यासन्नं तदसमवायि यदन्यत्तन्निमित्तमिति व्यवस्थाश्रयणमुचितं, न त्वनपेक्षिताप्रसिद्धद्रव्यान्तरसंयोगाभ्युपगमेन तस्यासमवायिकारणत्वाश्रयणं कारणान्तरानुपलब्धेः,दृष्टानुसाराच्च अणुगतरूपादौ तथाऽभ्युपगमः, इह तु तद्विपर्ययः प्रदर्शित एव एवमपि व्याप्तिबलेन यो द्रव्यान्तरसंयोगोऽनुमातव्यः स तर्हि स्पर्शवद्द्रव्यसमवेतो भौतिक एव चोपलब्ध इति प्रसिद्धदेहादिसंयोग एवानुमानपर्यवसानान्नवमद्रव्यसिद्धिः। अथोच्येत भौतिकत्वे हि मनसः पृथिव्याद्यन्यतमत्वेन भवितव्यम्, तच्चानुमानान्तरैर्व्यतिरेकमापादयद्भिः प्रत्यासिद्धम्। तथा हि न पार्थिवं मनः रसावगमनिमित्तेन्द्रियत्वात् रसनावत्, न पाथसीयं गन्धग्रहणनिमित्तेन्द्रि-

यत्वात् घ्राणवत् एवम् अतैजसत्वाद्यपि तत्तदिन्द्रिया-
गोचरग्रहणनिमित्ततया शक्याध्यवसानमिति अभौति-
कत्वं मनस इति, तदनुपपन्नं धर्मिविशेषविपरीतसाध-
नात् रसावगमनिमित्तेन्द्रियत्वमपार्थिवत्वमिव पायसी-
यत्वमपि समर्थयति, एवं साधनान्तराण्यपि भूतान्तरव्य-
तिरेकमिव आत्मीयभूतभावमापादयन्ति। अथ शब्दस्पर्श-
रूपरसगन्धेषु यद्गुणग्राहि यदिन्द्रियं तदेव तद्गुणकभूता-
रब्धं, हन्त तर्हि तदेव तदितरभूतव्यतिरेकितयाऽप्यवगत-
मिति न तदवगमकतामावेणाभिमतव्यतिरेकसिद्धिः। अ-
पि च शब्दादिगुणावगमसाधारणसाधनतया शरीरमि-
व पाञ्चभौतिकमेकद्वित्रादिभूतं वा इतरभूतसंसृष्टमस्तु
मनः, यथा ऽऽम्नायते अन्नमयं हि सोम्य मन इति।
ननु तन्न तत्प्रकृतित्वप्रतिपादनपरम् अपि तु तदधीनवृ-
त्तितामात्रप्रदर्शनार्थम् आपोमयः प्राणः इत्यादिवत्
अत एव अपवर्गदशायामपि मनोऽनुवृत्तिः, दर्शितं हि
तत्रैवाष्टमे मनसैतान्कामान् पश्यन् रमते मनोऽस्य दैवं
चक्षुः इति तथा परस्यास्य देवतायाः सोऽन्यं कामं मनसा
ध्यायीत इति महोपनिषदि, मनसैव जगत् सृष्टिम् इति
च पुराणे उच्यते सत्यमेवं द्रव्यान्तरपरिकल्पनातो व्र-
रमेवं वाय्वग्न्यादिमित्युक्तं, परमार्थतस्तु न भौतिकं नापि
नवमं द्रव्यं वा तर्हीदानीं मनःशब्दः बुद्धावेव अत एव
हि बुद्धिमान् मनस्वी इति व्यपदिश्यते मनसोऽवस्थाभे-
दाश्च द्वागेवापरोक्षयन्ते क्षुभितं मे मनः प्रसन्नं मे मनः
इति, एवं च मनसः करणतया व्यपदेशो बुद्ध्यहङ्कारयो-
रिव वृत्तिभेदप्रदर्शनपरः पूर्वेषामिति। उच्यते यदि बुद्धि-
रेव मनः यदि वा द्रव्यान्तरम् उभयथाऽपि तस्य न चेत-

नत्वमिति किमनेनाप्रतिज्ञातस्वरूपविमर्शेन, अस्तु तर्हि प्राण एवात्मा, तथा सति तदन्वयिनि शरीरे सात्मकत्व-प्रतीतिः तद्विरहिणि निरात्मकत्वप्रतीतिश्च उपपद्येयातां देहादुत्क्रान्तिर्लोकान्तरगमनं देहान्तरसंचारश्च उपपद्यन्तेतरां गत्वरस्वाभाव्यात् प्राणस्य, इतरथा परम-महतो महतश्च स्पर्शविरहिणः परिस्पन्दानुपपत्तेः उत्-क्रान्तिगत्यागतिश्रुतयोभाक्ताः स्युः इदमध्यसत् वायुत्वा-देव बाह्यवायुवत् प्राणस्य चैतन्यानुपपत्तेर्वृत्तिहीनेऽपि आत्मनि सुषुप्तौ प्राणस्य वृत्तिमत्त्वाच्च तद्वृत्त्या हि सुप्त-स्यापि सप्तधातुभावेनाशितपीतद्रव्यपरिणामः श्वासप्र-श्वासौ च तनुतरतेजोऽवन्नानुविद्धः कौष्ठ्यमारुतो हि प्राणः, स च कण्ठमुखनासाभ्यन्तरे बहिश्च रेचितः त्वचा स्पृश्यमानो घटादिरिव स्फुटमात्मतया चकास्ति। किंच

निरस्तो देहचैतन्यप्रतिषेधप्रकारतः।
प्राणात्मवादो न पृथक् प्रयोजयति दूषणम्॥

अविभुत्वेनास्यात्मनः स्पर्शविरहिणोऽपि प्रयत्नाद्-ष्टप्रेरणानुगुण्येन मनस इव उत्क्रान्तिगत्यादयो युज्यन्ते इति न तन्निर्देशानां मुख्यार्थता, परिमाणनिरूपणेऽप्ये-तद्विष्यतीत्यलमधुना, भवतु तर्हि संविदेवात्मा अजड-त्वात् जडत्वप्रतिबद्धं ह्यनात्म्यं घटादिषु दृष्टं, जड़त्वं च संविदो निवर्त्तमानं तदपि निवर्तयति, अजडत्वं च सं-वित्सत्तयैव प्रकाशमानत्वात्, न हि सती संवित् घटा-दिरिवाप्रकाशमानाऽवतिष्ठते येन परायत्तसिद्धिरा-स्थीयत। स्यान्मतं जातायामपि संविदि विषयमात्रं प्रथते न खलु नीलमिदमिति प्रतियन्तस्तदैवानीलमनि-दंरूपमपि संवेदनं प्रतीमः अतः स्वरूपसत्त्यैव संविदा

इन्द्रियसंनिकर्षेणैव विषयः प्रकाश्यते, ततश्च तद्गताग-न्तुकप्रकाशातिशयदर्शनेन पश्चात् संविदनुमास्यत इति तन्न ज्ञानव्यतिरेकिणोऽर्थधर्मस्य प्रकाशस्य निपुणमपि निरीक्ष्यमाणानां रूपादिवदनुपलब्धेः, उभयाभ्युपेतसंवि-देव सकलव्यवहारोपपत्तौ च तत्कल्पनानुपपत्तेर्विप्रतिवे-दितप्रतिभासशून्यायां च विषयवित्तावभ्युपगम्यमानायां घटस्यावदृश्यमहं तु जानामि न वेति न ज्ञायत इति च कदाचित्प्रतिभासः स्यात्, नचैवमस्ति, अतीताऽनागतवि-षयग्रहणस्मरणेषु व्याहारव्यवहारयोरभावे भावेऽपि ततः प्रागेव विदितत्वप्रतीतेः नानुमानिकी तत्र विषयसिद्धिः ततरां तत्पूर्विका तत्र बुद्धिसिद्धिः, तथा हि केनाचित्प्रेरि-तः प्रणिधाय स्मृत्वाऽनन्तरमेव प्रतिवदति स्मृतमद्य म-येति न चायमेव व्याहारस्तत्र लिङ्गं तत्पूर्वकत्वादन्यो-न्याश्रयप्रसक्तेश्च स्वव्याहारेण स्वज्ञानानुमानं क इव निरपत्रपः प्रतिजानीत । अन्यच्च यत्संबन्धादर्थान्तरे यो व्यवहारः धर्मभेदोवा स तस्मिन्नुपलभ्यमानस्तत्स्वरूपप्रयु-क्तः न तु तत्संबन्धनिबन्धनः यथा सत्तासंबन्धात् पृथि-व्यादिषु सद्व्यवहारः रूपसंबन्धाच्चाक्षुषत्वं सत्तायां रूपे च, एवं संवित्संबन्धात् प्रवर्तमानो घटादिषु प्रकाशत इति व्यवहारः प्रकाशमानत्वं वा धर्मः, संविदि तु परिदृ-श्यमानो न संवित्संबन्धापेक्षः, अपि तु तत्स्वरूपप्रयुक्त इति स्वयंप्रकाशत्वात्सैवात्मेति। किंच योऽपि संविदोऽन्यं सं-वेदितारमभ्युपगच्छति अभ्युपगच्छत्येवासौ संविदं, न ह्य-सत्यामेव संविदि संवेत्तीत्युपपद्यते एवं चेदुभयवादिसंप्र-तिपन्नतया सैव परं वेदिनी भवतु किमन्येन कल्पितेन, ननु अहं जानामीति ज्ञानातिरिक्तस्तदाश्रयभूतोऽयमा-

त्मा प्रतीयते, सत्यं स तु विकल्परूपतया साक्षात् प्रत्यक्ष इति न शक्यः संग्रयितुं, भेदज्ञानसिद्धवत्कारेण पृथग्वस्तुतया गृहीताव्यभिचारेण सहोपलम्भनियमेनाप्रकाशात्मनश्च स्वभावविरोधादेव प्रकाशायोगात् प्रकाशरूपाभावे च संवेदनत्वमित्यादिना वा प्रकाशात्मनोऽहमित्यंशस्य तत्त्वमेव दुरुपगमं ग्राह्यविकल्पप्रत्युद्धारेऽप्येष एव प्रकारः, अतोवासनाभिधानसमनन्तरप्रत्ययसामर्थ्यात् अनाद्यविद्यावशाच्च समारोपितावास्तवग्राह्यग्राहकविकल्पोल्लेखिनी स्वयंप्रकाशा संविदेव परमार्थसती सैव आत्मेति सौगताः प्रकटाः, प्रच्छन्नाश्च यथाहुः प्रकटाः।

अविभागोऽपि बुद्ध्यात्मा विपर्य्यासितदर्शनैः।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते॥

इति यथा वा प्रच्छन्नाः

शुद्धं तत्त्वं प्रपञ्चस्य न हेतुरनिवृत्तितः
ज्ञातृज्ञेयविभागस्य सायैव जननी ततः॥

इति, अत्राह क्षणभङ्गिनि प्रतिविषयमध्यास्याच संविच्चकास्ति, सैव चेदात्मा पूर्वेद्युर्दृष्टमपरेद्युरहमिदमद्राक्षमिति क्षयमिव प्रत्यभिजानीयात्, न च निरालम्बनप्रतिभाभेदमात्रतया बुद्ध समाधेयं निरालम्बनत्वप्रतिज्ञायाः प्रत्यक्षादिसकलप्रतीतिबाधितविषयत्वात् साधनस्य च सालम्बनत्वे तदविशेषादशेषशेमुषीणां तथात्वापत्तेः, निरालम्बनत्वे च साधनाभावादेव साध्यासिद्धेः प्रपञ्चितश्च पूर्वोत्तरमीमांसाभागयोर्निरालम्बनप्रतिषेधः यथार्थख्यातिसमर्थनेन च शास्त्र इति न व्यावर्ण्यते अत एव न संतानाश्रयणेनापि प्रत्यभिज्ञोपपादनं साधीयः, विज्ञा-

नलक्षणाव्यतिरिक्तस्य स्थायिनः अनुसंधायिनः संतानस्य अभ्युपगमे स्वसिद्धान्तत्यागः परसिद्धान्ताभ्युपगमश्च अनभ्युपगमे प्रत्यभिज्ञानुपपत्तिर्न ह्यन्येनानुभूते अन्यस्य प्रतिसंधानसंभवः, न च सुसदृशतया भेदाग्रहणेन प्रदीपादाविव प्रमातरि प्रत्यभिज्ञाभ्रान्तिर्युज्यते हि तत्रैकस्यैव पूर्वापरव्यक्तिदर्शिनस्तुल्यसंस्थानतया व्यक्तीनां भेदमविदुषस्तथा भ्रमः, इह तु संविद्यक्तयः परस्परवार्तानभिज्ञा निरन्वयविनाशिन्यश्च सुगतमत इति न तास्वेकत्वभ्रमस्याश्रयता विषयता वा संभविनी, न च सुसदृशत्वेऽपि अन्येन कृतमात्मकृततयाऽन्यो ऽनुसंधातुमलमित्यागमापायिसंवित्सन्तानाश्रयः प्रत्यभिज्ञानक्षणस्थायी चेतनोऽभ्युपगन्तव्यः । कश्चिदाह न संविदनित्या प्रागभावाद्यसिद्धेः तदसिद्धिश्च तस्याःस्वतः सिद्धत्वात्, न हि स्वतःसिद्धस्य प्रागभावादयः स्वतोऽन्यतो वा सिद्ध्यन्ति, स्वयं हि स्वाभावमवगमयत् सद्वा असद्वा साधयेत् असत्त्वे अभाव एव नास्तीति कथं साधयेत्, असत्त्वादेव साधकस्य पक्षान्तरे नतरां साधकत्वमिति न स्वतस्त्वावत्तत्सिद्धिः । नाप्यन्यतः अनन्यगोचरत्वादभूतेः अनुभाव्यत्वे च घटादिवत् अननुभूतित्वप्रसङ्गात् अतः सा न जायते, जन्माभावादेव इतरेऽपि भावविकारा निराकार्याः तत्प्रतिबद्धत्वात् तेषाम् अत एव नानात्वमपि संविदि प्रत्युक्तम्, उत्पत्तिमत्त्वव्यापकनिवृत्त्या तद्व्याप्यभूतनानात्वस्यापि निवृत्तिसिद्धेः, न ह्यजं विभाग्यस्ति चैत्यत्वाच्च भेदेतरेतराभावादयो न तद्धर्माः रूपादिवत् अतो नास्यानुमेयः कश्चिदपि धर्मोस्ति, अतोनिधूतनिखिलभेदा विकल्पनिर्धर्मप्रकाशमात्रैकरसा कूटस्थनित्या संविदेवात्मा परमात्मा च

यथाह याऽनुभूतिरजाऽमेया ऽनन्तात्मेति सैव च वेदान्तवाक्यतात्पर्यभूमिः इति तेषां परिभाषा यथाह तद्वार्त्तिककारः।

परागर्थप्रमेयेषु या फलत्वेन संमता।
सं वित्सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः॥
अप्रामाण्यप्रसक्तिश्च स्वादितोऽन्यार्थकल्पने।
वेदान्तानामतस्तस्माान्नान्यमर्थं प्रकल्पयेत्॥

इति, तदिदमलौकिकमवैदिकं च दर्शनमित्यात्मविदः तथा हि संविदिति स्वाश्रयं प्रति सत्तयैव कस्यचित् प्रकाशनशीलो ज्ञानावगत्यनुभूत्यादिपदपर्यायनामा सकर्मकः संवेदितुरात्मनो धर्मः प्रसिद्धः, तथैव हि सर्वप्राणभृत्प्रत्यात्मसिद्धोऽयमनुभवः अहमिदं संवेद्मीति तस्योत्पत्तिस्थितिनिरोधाश्च सुखदुःखादेरिव प्रत्यक्षाः प्रकाशन्ते स्वापमदमूर्च्छादशासु च योग्यानुपलम्भनिराकृतस्तदभावो नाभ्युपगममर्हति, यदि हि तास्वपि दशासु संवेदनमवर्त्तिष्यत ततः प्रबोधसमये अनुसमधास्यत, न च अनुसंधीयते अत एव हि इयन्तं कालं न किंचिदहमज्ञासिषम् इति प्रबुद्धः प्रत्यवमृशति यावदनुभूतपदार्थस्मरणनियमाभावेऽपि संस्कारविच्छेदनिमित्तप्राबल्यादिप्रबलहेतुविरहेऽपि नित्यवदस्मरणमनुभवाभावमेव साधयति, न च सत्यपि संवित्प्रकाशे विषयावच्छेदविरहात् अहङ्कारगोचरापायाद्वा तत्स्मृत्यनुदयः अर्थान्तराभावस्य तद्ग्रहणस्य च अर्थान्तरप्रकाशप्रयुक्तकार्यप्रतिबन्धकत्वायोगात्। त्रितयावभासेऽपि यथास्वमवभासानां स्वगोचरस्मरणहेतुत्वात् न च प्रत्यभिज्ञाबललब्धस्थेमाऽहमर्थः स्वापादिदशासु निधनमुपगत इति शक्योऽभिधा-

तम्, अत एव हि इयन्तं कालमहमस्मीति प्रबोधे परामर्शः, न च निर्विषया निराश्रया वा संविन्नाम काचित्संभवति अत्यन्तानुपलब्धेः, संवच्छिशब्दाश्च संविदनुभूतिज्ञानप्रकाशादिशब्दा इति शब्दार्थविदः, न हि अकर्मकस्य जानात्यादेरकर्तृकस्य वा प्रयोगो लोके वेदे वा। यत्तु स्वतःसिद्धस्य सत्त्वे तद्विरोधादेव प्रागभावादेः तदानीमवस्थानासंभवात् न ततः सिद्धिरिति-तदतिस्थवीयः, न हि संविदा स्वकालवर्त्तिन एव अर्थाःसिध्यन्तीत्यस्ति नियमः अतीतानागतयोरसंवेद्यत्वप्रसङ्गात्। अथ संवित्प्रागभावादेः सिध्यतः तत्समकालतया भवितव्यमिति किमेवं क्वचिद् दृष्टम् हन्त एवं सति तत्सिद्धेर्न प्रागभावाद्यसिद्धिः तत्प्रागभावः तत्समकाल इत्युन्मत्तवचः ऐन्द्रियकप्रत्यक्षस्वभावो ह्ययं स्वसमकालपदार्थप्रकाशकत्वं नाम न ज्ञानमात्रस्य प्रमाणमात्रस्य वा। एतेन तदपि प्रत्युक्तम्।

मानं स्वयंप्रकाशत्वात् स्वतः सद्धेत् सदाऽस्त्यतः।
तन्मेयं च सदाऽस्त्येव मानं मेययुगेव हि ॥

इति, न हि मानस्य स्वसत्ताकाले अर्थाविनाभावी मेययोगः किंतु यद्देशकालादिमत्तया मेयमवभासते तादृशतद्रूपमिथ्यात्वविरोधित्वम्, अत एव स्मृतिर्न वाह्यविषया नष्टेऽर्थे स्मृतिदर्शनात् इत्यपि प्रलापः। अथ संवित्प्रागभावादेः अवर्तमानतया न प्रत्यक्षत्वं लिङ्गाद्यभावाच्च न प्रमाणान्तरतः सिद्धिरिति, यद्येवमकारणं तर्हि स्वतःसिद्धत्वं प्रागभावाद्यसिद्धेः, प्रमाणाभाव एव हि इदानीं वाच्यः, न च तदभावः शक्योऽभिधातुमित्युक्तमेव योग्यानुपलब्ध्यैव अभावस्य समर्थि-

तत्वात्, अपि च प्रत्यक्षसंवित् स्वसत्ताकाले स्वविषयस्य सद्भावं साधयन्ती यत्तस्य न सर्वदा सत्तां साधयति तदवशीयते अहमिदानीमेवास्मि नान्यदेति कालविशेषावच्छिन्नैव सा चकास्ति इति, इतरथा घटादेरपि नित्यत्वप्रसङ्गात्, एवमनुमानादिसंविदोऽपि, न च प्रत्यक्षानुमानादिभेदशून्या निर्विषया निराश्रया धीः संभवतीत्युक्तमेव न चान्याविषयत्वात् संविदोऽन्यतस्तत्प्रागभावाद्यसिद्धिः, अज्ञासिषमिति प्राक्तनसंविदोऽद्यतनधिया विषयीक्रियमाणत्वात्, प्रतिकूलानुकूलविषयनियतहानोपादानादिलिङ्गावगम्यत्वाच्च, परसंविद्वत्, तदनभ्युपगमे च शब्दार्थग्रहणासंभवेन वैदिकलौकिकसमस्तव्यवहाराभावप्रसङ्गः गुरूपसर्पणाद्यनुपपत्तिश्च, ज्ञानवत्त्वेन तस्याप्रतीतेः, न चान्यविषयत्वे अननुभूतित्वं स्वाश्रयस्य स्वसत्तयैव प्रकाश्यमानत्वं स्वविषयसाधनत्वं वाऽनुभूतित्वं, ते च संविदन्तरविषयभावेऽपि स्वानुभवसिद्धे नभृश्यत इति, कथमननुभूतित्वप्रसङ्गः, घटादेस्तु तथा स्वाभाव्याभावादेव अननुभूतित्वं नानुभाव्यत्वात्, अपि च अननुभाव्यत्वेऽपि समानस्तत्प्रसङ्गः गगनकुसुमवत्, न चात्मनोऽनुभूतित्वम् अनुभवितृत्वात्। नाप्यसावननुभाव्यः अनुभवस्यैव स्वतः सिध्यतोऽप्यस्य स्वपरसंवेद्यत्वाभ्युपगमात् वेद्यत्वेऽनात्मत्वापादनम् अवेद्यत्वेऽपि समानं पूर्ववत्, यदि तु गगनकुसुमस्य सत्त्वमेव अनात्मत्वाऽननुभूतित्वप्रयोजकमास्थीयेत आस्थीयतां तर्हि घटादेरप्यसंविदाश्रयत्वाज्ञानाविरोधित्वयोरेव तत्प्रयोजकत्वम्। अथ ते अपि विषयत्वे स्यातामिति चेत् अविषयत्वेऽपि तथैवेत्यलमप्रतिष्ठितकुतर्कोपहसनेन। यद्यपि जननविरहादनुभूतेर्विकार-

रान्तरनिरसनं व्यभिचरति तदपि प्रागभावे जन्माभावेऽपि तस्य विनाशदर्शनात् भावविशेषणोपादानेऽपि भवदभिमताविद्ययाऽनैकान्त्यं, सा ह्यनादिरपि विविधविकारवती विनाशवती च तत्त्वज्ञानोदयात्, अपरमार्थास्तद्विकाराः सन्ति इति चेत् परमार्थाश्च ते किं विकाराः सन्ति जन्मवन्तो वा परमार्थाः, येन पारमार्थ्येन विशेषणं साध्यस्य साधनस्य वार्थवत्तामश्नुवीत। तथा च सति साधु समर्थितं तर्ककुशलेनेत्यलमनेन । यदपि न ह्यजं विभाग्यस्तीति तदपि न अजस्यैवात्मनो देहेन्द्रियादिभ्यो विभागस्य समर्थितत्त्वात्, अनादित्वेनाभ्युपगतस्याज्ञानस्यात्मनोव्यतिरिक्ततयाऽवश्याश्रयणीयत्वात् अपरमार्थस्य विभाग इति चेत् परमार्थभेदः किं जन्मप्रतिबद्धः क्वचिद्दृष्टः निर्बाधः प्रतीतिसिद्धश्च दृग्दृश्यभेदः परमार्थ एवेत्यनन्तरमेवोपपादयिष्यामः । यदपि नास्यामेयोधर्मोऽप्यस्ति चेत्यानां न चिद्धर्मत्वमिति च तदपि शास्त्रानुमानादिप्रमाणसिद्धैः स्वयंप्रकाशत्वनित्यत्वादिधर्मैः स्वयमभ्युपगतैरनैकान्तिकम् । न च तेचितिमात्रमिति वाच्यं तत्सिद्धावपि तेषु विमतिदर्शनात् अभ्युपगम्यैव हि संविदं तदनुमेयत्वक्षणिकत्वादि प्रतिजानते वादिनः । स्वरूपभेदाच्च स्वाश्रयं प्रति सत्तयैव कस्यचित्प्रकाशनं हि संवेदनं, स्वयंप्रकाशता तु सत्तयैवात्मने प्रकाशमानता, प्रकाशश्च चिदचिदशेषपदार्थसाधारणो धर्म इति संवित्सिद्धावेव साधितं, तदनभ्युपगमे तु व्यवहारानुगुण्यवचनः प्रकाश--शब्दः, नित्यता तु सर्वकालवर्त्तमानता, एकसंख्यावच्छेदः एकत्वमिति । न च जडत्वकालदेशनानात्वाद्यवच्छेदशून्यतारूपत्वात्तेषां न यथोक्तदोष इति युक्तं

तथा रूपैरपि तैश्चितिधर्मभूतैरनैकान्त्यस्यापरिहार्यत्वात्, संविदि च निषेध्यत्वाभिमतजडत्वानित्यत्वनानात्वादिविरुद्धविविधधर्माभावे निषेधोक्तिरुक्तिमात्रमेव चैत्यं चाज्ञानमात्मनि दृष्टमिष्टं च भवताम्, अपि च अस्या इति षष्ठ्या अनुभूतेः संबन्धमभिधाय निर्धर्मत्वं प्रतिज्ञायमानं वन्ध्यात्वमिव जनन्या विरुद्धार्थमापद्येत।

सिद्धिश्चेदभ्युपेयेत संविदः स्यात्सधर्मता।
न चेत्तुच्छत्वमेवोक्तं भवेच्छशविषाणवत्॥

ननु सिद्धिरेव सा कस्य भोः, यदि न कस्यचित्, न तर्हि सिद्धिरेव, सा हि पुत्रत्वमिव कस्यचित्किंचित्यति, आत्मन इति चेत् कः षष्ठ्यर्थः तदेवं व्योमारविन्दसदृशवपुषि यथोदितदृशि वेदान्ततात्पर्यवर्णनं वेदान्तायैव स्यात्, अपि च नित्यत्वेऽप्यनुभूतेः प्रत्यभिज्ञाऽनुपपत्तिस्तदवस्थैव सा ह्यनुभवितारं पूर्वापरकालावस्थायिनमुपस्थापयति, अहमिदमन्वभूवमिति अनुभूतिस्त्वनुभूतिरेव भवतां न तां प्रति सा कर्त्री कर्म वा यद्युच्येत परमार्थतस्तथा भूतापि भ्रान्त्या अनुभवित्रतया परिस्फुरति रजततयेव शुक्तिः, न हि तथ्यमनवलम्ब्य मिथ्यावभासस्योत्थानमिति तन्न तथा सत्यनुभवसमाधिकरणतया अनुभविताऽहमर्थः प्रकाशेत अनुभूतिरहमिति पुरःस्थितभास्वरद्रव्यशङ्खमुखचन्द्रादेराकारतयेव रजतपीतमुकुरस्थताद्वित्वादिदृष्टयगवभासमान एव त्वयमनुभवः दण्ड इव देवदत्तमर्थान्तरमहमर्थं विशिंषन्नालक्ष्यते अनुभवाभ्यहमिति। तदेवमनुभवविशिष्टमस्मदर्थमवभासयन्नयमहंप्रत्ययः काष्ठमिव विशेषणभूतानुभूतिमात्रावलम्बनः प्रतिज्ञायेत दण्डमाच इव दण्डी देवदत्त इति प्रत्ययः, कुतश्चैष

निश्चयोऽध्यक्षं ज्ञातृत्वमिति स्थूलोऽहमितिवद् देहात्माभिमानवतः प्रतिभासनादिति चेत् नन्वात्मतयाऽभिमताऽनुभूतिरपि तद्वत एवावभातीति साऽपि तथा स्यात् तत्त्वज्ञानोदयात्परतोऽपि तदनुवृत्तेर्न तथासे ति चेत् किं भोः तत्त्वज्ञानात् परमबोद्वैव अयमात्मा, हन्तैवं वरमितो ऽतत्त्ववेदित्वम्, भ्रान्त्याऽपि हि तत्र वहु भद्रं पश्यतीति । ननु ज्ञातृत्वं ज्ञानक्रियाकर्तृत्वं विक्रियात्मकं जडमहङ्कारग्रन्थिस्थं तत्फलभुक् अकर्ता अविक्रियः साक्षी प्रकाशमात्र आत्मा कर्तृत्वादिर्हि दृश्यत्वात् रूपादिवन्नात्मधर्मः कर्तृत्वे ह्यात्मनोऽहंप्रत्ययगोचरत्वेऽपि देहस्येव अनात्मत्वपरार्थत्वजड़त्वादिप्रसङ्गोदुर्निवारः, दृष्टं च लौकिकवैदिककर्मसु कर्तृतया प्रसिद्धाद्देहात्तत्क्रियाफलभुजः प्रमातुरहंप्रत्ययिनः पृथक्त्वं तथेहापि प्रमातुरहमर्थाद्विलक्षणः साक्षी प्रत्यगात्मेति युक्तं नैवं युक्तम् अहं जानामीति ज्ञातृतया सिध्यतः प्रत्यगात्मनो व्यतिरेकेण साक्षिणो नाम प्रकाशमात्रस्य आत्मनोऽनुपलब्धेः, देहेन्द्रियमनःप्राणविज्ञानेभ्यो ज्ञानाश्रयतया विविच्यमाने प्रतीपमञ्चतीव निर्भासमानोऽहंभाव एव हि प्रत्यक्षं नाम, साक्षित्वमपि तस्य साक्षाज् ज्ञातृत्वं न ह्यजानन् साक्षीति व्यपदिश्यते सर्वञ्च प्रकाशमानं ज्ञानेऽहमिति चकास*ते ,प्रकाशत इति प्रत्यात्मसिद्धोऽयमनुभवःअहं जानामि मह्यं प्रकाशत इति न चाव्याकृतपरिणामभेदस्य अहंकारनाम्नो बुद्धिनाम्नोऽथवा ज्ञातृत्वं देहस्येव अचेतनत्वपरिणामित्वजडत्वपरार्थत्वादिहेतुभिस्तदनुपपत्तेः, नच चिति-

* शत्रन्तस्य चतुर्थ्यन्तम् ।

च्छायापत्त्या तयोस्तत्संभवः अचाक्षुषस्य छायाऽदर्शनात्, न च ज्ञातृत्वं चितावपि ते वास्तवमस्ति येन अग्निसंपर्कादयःपिण्ड इव औष्ण्यं तत्संपर्कादर्थान्तरे ज्ञातृत्वं जायेत ज्ञायेत वा, यदुच्येत ज्ञप्तिमात्रमेव आत्मानमभिव्यञ्जन्नचेतनोऽपि अहङ्कारः स्वाश्रयतया तन्नभिव्यनक्ति, स्वभावो ह्ययं व्यञ्जकानां यदात्मस्थतयाऽभिव्यङ्ग्यमभिव्यञ्जन्ति दर्पणजलखण्डसुखण्डादय इव सुखमिहिरबिम्बगोत्वादीन् तत्कृतस्त्वायम् अहं जानामीति भ्रमः, अत एव खलु अहमुल्लेखविगमे सुषुप्तिमुक्त्योः स्वाभाविकविशदानुभवमावहपेणात्मनः प्रकाशः तत एव च अनात्मत्वमहमर्थस्य, तथा च सौरेशं वचः ।

आत्मनश्चेदहंधर्मो यायान्मुक्तिसुषुप्तयोः ।
यतो नान्वेति तेनायमन्यदीयो भवेदहम् ॥

इति, तदिदमसंबद्धं यतः

शान्ताङ्गार इवादित्यमहङ्कारो जडात्मकः ।
स्वयंज्योतिषमात्मानं व्यनक्तीति न युक्तिमत् ॥

आत्मत्वाभिमताजडानुभवाधीना हि सर्वपदार्थाभिव्यक्तयोऽभिप्रेयन्ते तादृशमशेषार्थसाधकमुदयास्तमयविपरिवृत्तिशून्यप्रकाशस्वभावं तत्त्वमनुभवं तदधीनसिद्धिरचिदहङ्कारोऽभिव्यनक्तीति उपहास्यमिदमात्मविदाम् ।

किंच ।

व्यङ्क्तृव्यङ्ग्यत्वमन्योन्यं न च स्यात्प्रातिकूल्यतः ।
व्यङ्ग्यत्वेऽननुभूतित्वमात्मनि स्याद्यथा घटे ॥

दिनकरकरव्यङ्ग्यकरतलं तदभिव्यञ्जकं दृष्टमिति मा वोचः करतलस्य तद्वाहुल्यमावहेतुत्वात् तथा भूताश्च दिनकरमरीचयः स्फुटमुपलभ्यन्त इति न करतल-

व्यङ्ग्यत्वम् अपि च कीयमभिव्यक्तिः या अनुभूतिरूपस्य आत्मनः अहङ्कारेण क्रियते इत्युच्यते, न तावत्तत्सिद्धिः, तस्य स्वतःसिद्धत्वेनानन्याधीनसिद्धित्वाभ्युपगमात् । नापि तद्विषयज्ञानं ज्ञानान्तराननुभाव्यत्वात्, अनुभाव्यत्वे हि घटादिवदननुभूतित्वप्रसङ्गः, अत एव न ज्ञानकरणानुग्रहः स हि वेद्यगतज्ञानोदयप्रतिबन्धकापनयनेन वा दीपेनेव संतमसनिरसनेन चक्षुषः, वेद्यसन्निकर्षोपाधित्वेन वा व्यक्तिदर्पणादेरिव जातिनिजमुखादिबोधकस्य नयनादेर्वेक्तृगतकलङ्कक्षालनेन वा शमदमादिनेव परावरात्मतत्त्वज्ञानोपायस्य आगमादेर्न तावदनुभवगतमहङ्कारापनेयमस्ति किंचित् ज्ञानोदयपरिपन्थि, अज्ञानं तु ज्ञानसमानाश्रयविषयतया न तदुभयभावविरहिणि भवदभिमतसाक्षिणि निक्षेपमर्हति, न खलु ज्ञानप्रसक्तिशून्यो घटादिरज्ञानीत्युच्यते तथैव न जातुचिज् ज्ञातृत्वं ज्ञानमाचक्षेति न तस्याऽप्यज्ञानं भवेत्, भवदपि तदहङ्कारापनेयं नेष्यते ज्ञानैकनिवर्त्यत्वादज्ञानस्य तथाऽभ्युपगमाच्च, ज्ञानं च स्वविषय एव अज्ञानं निवर्त्तयति, न च तद्विषयत्वमात्मतयाऽभिमतस्याऽनुभवस्येष्यत इति तत्त्वयमज्ञानं न केनचित्कदाचिदुच्छिद्येत ज्ञानप्रागभावरूपं चाज्ञानं न ज्ञानोत्पत्तिप्रतिबन्धकमिति शक्यं व्यपदेष्टुं भावरूपमज्ञानमनिर्वचनीयं जगदुपादानमित्यादिप्रलापमात्रमिति संबन्धनिरूपणे प्रतिपादयिष्यते अतो न वेद्यदोषापनयनरूपाहङ्कारेणानुभवाभिव्यक्तिः।

करणानामभूमित्वान्न तत्संबन्धहेतुता।
अहमर्थस्य बोद्धृत्वान्न स तेनैव शोध्यते॥

न च स्वाश्रयतयाऽभिव्यङ्ग्यप्रकाशनमभिव्यञ्जयितुः स्वभावः प्रदीपादावदर्शनात् यथाऽवस्थितवस्तुप्रकाशानुकूलस्वभावत्वाच्च ज्ञानतत्साधनतदनुग्राहकाणाम्। तच्च स्वतःप्रामाण्यन्यायात्, तदनभ्युपगमे च सर्वचानाश्वासप्रसङ्गात्, व्यक्तेस्तु जातिराकार एवेति तथा प्रत्यायनं न व्यञ्जकत्वप्रयुक्तम् उक्तादेव व्यभिचात्, दर्पणादिस्तु नायनमहःप्रतिफलनलक्षणदोषहेतुर्नाभिव्यञ्जको वदनादेः व्यञ्जकस्त्वालोकादिरेव व्यञ्जकत्वेऽपि प्रतीपगमनदोषप्रयुक्तस्तत्रान्यथाऽवभासः, न चेह तथाऽहमर्थस्य तादृशदोषापादकत्वं स्वभावः, तथा सति सर्वस्यापि प्रत्यक्षादेरप्रामाण्यप्रसङ्गात् न किंचित्तथ्यं स्यात् तस्माज् ज्ञाटतया सिध्यन्नहमर्थ एव प्रत्यगात्मा न ज्ञप्तिमात्रम्। यत्तु सुषुप्तिमुक्त्योर्ज्ञप्तिमात्रतया स्फुरणम् अहमिति तु न प्रतिभातीति तत्र सुषुप्तौ तथाऽवस्थितिः पुरस्तादेव निरस्ता अहमित्येकरूपेणाप्रबोधात्तत्राप्यात्मनः स्फुरणात् यदि परं परागर्थाननुभवात् तमोगुणाभिभवाच्च न विविच्य स्फुटं चकास्ति भवदभिमतानुभूतिरपि तदानीं तथैव हि प्रथत इति वाच्यम्। नाहमहं नाप्यर्थान्तरमपि तु अनुभूतिमात्रमज्ञानसाक्षितयाऽवतिष्ठत इत्येवंविधं स्वापसमयभवमनुभवन् न हि सुप्तोत्थितः कश्चित् परामृशन्नुपलब्धचरः एतावन्तं कालं न किंचिदहमवेदिषमिति परामर्शनादेव तथात्वं लभ्यत इति चेत् कथमिव, न किंचिदिति निर्देशादिति चेत्। नन्वेवमनुभूतिप्रतिभासोऽपि प्रत्याख्यातः स्यात्, अपि च सुषुप्तिसमयसिद्धमात्मानमहमिति परामृश्य न किंचिदवेदिषमिति तस्य वेदने प्रतिषिध्यमाने तात्कालिकीं विच्छित्तिसिद्धिम् अहमर्थस्य चासि-

ङ्गिमभिदधानोऽनुभवविरोधमपि न जानाति देवानाम्प्रियः निर्विषया निराश्रया च वित्तिर्नास्तीत्युक्तमेव । ननु मामप्यहं न ज्ञातवान् प्रसुप्त इत्यस्ति हि प्रबोधे प्रत्ययः, सत्यम्, सतु वर्णाश्रमादिविशिष्टतया प्रबोधसमयसंवेद्यमानं देहिनं मामित्यादाय स्वाप्ययावस्थाप्रसिद्धाविशदस्वानुभवैकतानो अहमर्थस्य तेन रूपेणाज्ञातत्वं प्रज्ञापयति, न पुनर्ज्ञस्वभावस्य अहमर्थस्यापि । एवमिव खल्वयमनुभवः अत्र सुप्तोऽहमीदृशश्चेति एवं मामपि न ज्ञातवानहमिति अपि च आत्मा सुषुप्तावज्ञानसाक्षित्वेनास्ते इति हि यौष्माकी स्थितिः साक्षित्वं च साक्षाज् ज्ञातृत्वमित्युक्तं, स चायं जानामीति प्रतिभासमानोऽस्मदर्थ एवेति कथमिव तदानीमहमर्थो न प्रथेत, स्वस्मै स्वयंप्रकाशमानोऽहमित्येव हि प्रकाशते तत्सिद्धं स्वापादिदशास्वपि आत्मा प्रकाशमानोऽहमित्येव प्रकाशत इति । यत्तु मुक्तावहमर्थोनोपावर्त्तत इति तद् वार्तं यतस्तथा सति वैनाशिकदर्शन इव आत्मनाश एवापवर्गः प्रकारान्तरेण प्रतिज्ञातः स्यात् नो खल्वहमिति धर्ममात्रं येन तदपगमेऽप्यविद्यानिवृत्त्यामिवात्मनः स्वरूपेणावतिष्ठत इत्युच्यते अहमित्येव हि तस्य स्वरूपं, ज्ञानमपि हि तद्धर्मत्वेन तस्यैव प्रकाशते ज्ञानं मे जातमिति का कथा पुनरर्थान्तरस्यात्मत्वे । अन्यच्च यः सांसारिकदुःखैर्दुःखित्वेनात्मानं तत्त्वतो भ्रान्त्या वा प्रत्येति दुःख्यहमिति स सर्वमिदमनिष्टजातं कथमहमपुनरुदयमपनुद्य अव्याकुलं स्वस्थो भूयासमिति संजातमुमुक्षुः तत्साधने प्रवर्तते स यदि साधनानुष्ठानादहमेव न भविष्यामीत्यवगच्छति अपगच्छेदसौ मोक्षकथाप्रसङ्गादपि, ततश्चासंभवदधिकारितया

सर्व एव वेदान्तविधयः सर्वाणि च मोक्षशास्त्राणि प्रामाण्यादेव प्रच्यवेरन् अहमुपलक्षितः प्रकाशोऽपवर्गेऽवस्थास्यत इति चेत् किमतः, न हि मयि नष्टेऽपि कोऽपि प्रकाशः स्थास्यतीति कश्चित्प्रेक्षावान् प्रयस्यति, एतेन तदपि परास्तम् अस्मत्प्रत्यये योऽनिदमंशश्चिदेकरसः प्रकाशः स आत्मा तस्मिंस्तद्बलनिर्भासिततया लक्षणतो युष्मदर्थ एव अहं जानामीति सिध्यन्नर्थ इति प्रत्यक्षविरोधात् अहं जानामीति सिध्यँश्चेतनो युष्मदर्थ इति माता बन्ध्येतिवद्याहतार्थं वचः, न चासावन्याधीनावभासः चैतन्यस्वभावतया स्वयंज्योतिष्ट्वात् प्रकाशश्च प्रकाशत्वादेव कस्यचिद् भवेत्। दीपादिप्रकाशदिति नात्मा भवितुमर्हति अतो ज्ञातृतया अहमिति सिद्ध्यन्नर्थ एव आत्मा, स च सुक्तावप्यात्मनेऽहमित्येव प्रकाशते स्वस्मै प्रकाशमानत्वात् यो यः स्वस्मै प्रकाशते स सर्वोऽहमित्येव प्रकाशमाने दृष्टः यथा तथा प्रकाश†मानत्वेनोभयवादिसंमतः संसार्यात्मा, यः पुनरहमिति न चकास्ति नासौ स्वस्मै प्रकाशते यथा घटादिः, प्रकाशते चायं सुक्तात्मा तस्मात्सोऽहमिहमित्येव पकाशते। न चैवं प्रकाशमानत्वे सुक्तस्याज्ञानित्वसंसारित्वादिप्रसङ्ग आपादनीयः सुक्तत्वविरोधात् अतदुपाधित्वाच्च तत्प्रत्ययस्य, न ह्यज्ञानोपाधिरहं प्रत्ययः ब्रह्मात्मापरोक्षज्ञानक्षपितनिरवशेषाविद्यानामपि वामदेवादीनामतत्प्रत्ययदर्शनात्, श्रूयते हि तद्वै तत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च अहमेव च वक्तामि भविष्यामि इत्यादि, तथा कथंचिदप्यविद्यादिक्लेशैर्लेशतोऽपि जातुचिदपराष्टस्य परमपुरुष-

† अवभासमानत्वेनेति पा.।

स्याथहमित्यात्मपरामर्शः प्रज्ञायते हन्ता हमिमास्तिस्रो देवताः, बहु स्यां प्रजायेय स ईक्षत लोकान्नु सृजा इति तथा

यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥
तेषामहं समुद्धर्त्ता, अहं बीजप्रदःपिता ।
वेदाहं समतीतानि ॥

इत्यादिभिः । एवं च साक्षादहमर्थादात्मनो विलक्षणेऽपि देहे येनाव्यक्तिकपरिणामभेदेनाऽहमिति भ्रमः तदभिप्रायोऽहंकारस्य देवान्तर्भावोपदेशः भगवतः महाभूतान्यहङ्कारः इति बहुमन्तव्यजनावधीरणहेतुश्चासौ गर्वापरपर्यायस्तत्रतत्र शास्त्रेषु प्रायशो हेयतयोपदिश्यते तस्मादहमिति मतिर्बाधकापेता साक्षादात्मगोचरैव, अनात्मनि तु शरीरे भवन्ती अविद्येति युक्तम् । उक्तं च

श्रूयतां चाप्यविद्याया: स्वरूपं कुलनन्दन ॥
अनात्मन्यात्मबुद्धिर्या इति

महर्षिणा वासिष्ठनन्दनेन ॥ न च ज्ञप्तिमात्रप्रतिभासः कस्यचिच्छरीरेऽस्ति येन तन्मात्रात्मवादिनोऽप्यनात्मबुद्धिरुपपद्येत ।

अतः प्रत्यक्षसिद्धत्वादुक्तन्यायागमान्वयात् ।
अविद्यायोगतश्चात्मा ज्ञाताऽहमिति भासते ॥

यदुक्तम् अजडत्वाद्विक्तिरेवात्मेति तच्चेदं वाच्यं किमिदमजडत्वं नामेति यद्युच्येत सदपि यत् न प्रकाशते तज्जडं तद्विपरीतमव्यभिचरितप्रकाशसत्ताकमजडम् इति, तथा सति सुखादिव्यभिचारी हेतुः न खलु सुखदुःखेच्छादयो विद्यमाना अपि कदाचिदनवभासमाना भवन्ति स्वसत्ताप्रयुक्तप्रकाशत्वमपि दीपादिभिरनैकान्तिकं

ज्ञानव्यतिरिक्तप्रकाशानङ्गीकाराच्चासिद्धता विरुद्धता च। यदि मतम् अव्यभिचरितप्रकाशोऽपि सुखादिरन्यस्मै प्रकाशत इति घट इव जडतां नातिवर्तते तेनानात्मेति, ज्ञानं वा किं स्वस्मै प्रकाशते, अन्यस्यैव हि तदपि जानतोऽहमर्थस्य प्रथतेऽहं जानामीति अहं सुखीतिवत्, तेन स्वस्मै प्रकाशमानत्वमभिप्रेत्य प्रयुज्यमानो जडत्वहेतुरसिद्धः संविदि, अतः सत्तयैव स्वमात्मानं प्रति सिद्ध्यन्नजडोऽहमर्थ एवात्मा तत्संबन्धायत्ता तु ज्ञानस्यापि प्रकाशता, अत एव हि स्वाश्रयचेतनं प्रति प्रकटता इतरं प्रत्यप्रकटता च ज्ञानस्य सुखदुःखादेरिव, न चैवमात्मान्तरसंबन्धमर्थान्तरं वाऽपेक्ष्यायमात्माऽत्मने प्रकाशते एतच्चानन्तरमेवोपपादयिष्यते, न च ज्ञानेन सहोपलम्भनियमोऽहमर्थस्यार्थान्तरतां वारयति ज्ञानस्यापि तथात्वप्रसङ्गात्, तदपि हि तेन नियतेन सहोपलक्ष्यमित्यहमर्थादनर्थान्तरं मिथ्यारूपमेवापद्येत, असिद्धश्च संविद्विशेषैः सहोपलम्भनियमः प्रत्येकं व्यभिचारदर्शनात्, न च विशेषमात्रं निर्धूतनिखिलविषयविशेषोपश्लेषं वा वित्तिमात्रमस्ति येन सहोपलम्भनियमः संवेदितुरभिधीयेत, सामान्यं तु सदपि सौगतैर्न वस्तुतयाऽऽश्रीयते समस्तवृत्तिप्रत्यस्तमयेऽपि स्वयंज्योतिरयमात्माऽवतिष्ठत इति च वक्ष्यामः, स्ववाग्विघातश्च एकं द्वाविति निर्देशात् द्वयोर्हि एकक्रियानुप्रवेशे सहशब्दः शिष्येण सहागच्छत्याचार्य इति यथा, अपि च नील--तद्वियोरिति द्वे उपादायाभेद इत्येकत्वविधिः सवितुर्दग्ध्यात्वविधिरिव अनेकान्तश्च, संविदि प्रतिषिध्यमानैर्जडत्वादिभिः सर्वज्ञज्ञानेन सहोपलम्भनियमभा-

गिभिः संसारिज्ञानैश्च तेषामभेदाभ्युपगमे ज्ञानस्य जडत्वमूर्तत्वादिबुद्धस्य बहुत्वमित्यापद्येत नियमेन एकज्ञानसिद्धत्वमप्युक्तप्रकारेण प्रत्युक्तं विपक्षव्यतिरेकस्यासिद्धः । भवतु नियमेन एकज्ञानसिद्धत्वं ज्ञानज्ञेयज्ञातृणां मा च भूद्भेदः को विरोधः ।

किमप्रकाशरूपत्वात् प्रकाशमनुरुध्यते ।
व्यवहाराय नीलादिराहोस्वित्तदभेदतः ॥
इति संदिह्यमानत्वान्नाभेदः शक्यनिर्णयः ।
बोध्यस्यैष नियमो न पुनर्बुद्धिबोद्धृगः ॥

स्पष्टश्च प्रत्यक्षबाधः सर्वज्ञानेषु वेद्यादिव वित्तेरपि वेदितुर्भेदस्यापरोक्षत्वात्, न च प्रतियोगिनः प्रत्यक्षत्वं दृश्यत्वं वा भेदस्यापरोक्ष्ये त्वपेक्षितव्यं सिद्धिमात्रेण तदुपपत्तावप्रयोजकत्वेन तद्विशेषस्यानाक्षेपात् अनवभासमानेऽपि प्रतियोगिनि भावाः स्वरूपत एव विलक्षणाः प्रत्यक्ष्यन्त इति सर्वलोकस्वसाक्षिकमेतत् । ननु जीवतोभेदप्रत्यक्षस्य शिरसि पदनिधानेन सहोपलम्भनियमस्याभेदेन प्रतिबन्धग्रहणमिति कथमिव ततस्तद्बाधसंभवः तथा सति हि ज्वालाभेदानुमानमपि तदेकत्वप्रत्यभिज्ञयाऽपोद्येत अविशेषज्ञोदेवानांप्रियः तत्र हि क्लृप्तकारणदोषानुवृत्तौ सत्यां जायमानोऽपरोक्षावभासो न निरवद्यप्रत्यक्षपूर्वकमनुमानं बाधितुमर्हति, तथाहि अचिरनिर्वापितारोपितेषु एकवर्तिभागवर्तिषु बहुषु दीपेषु तद्भेदादर्शिनः सुसदृशतया स एवायमिति स्मृतिरुपजायत इति दृष्टम्, अतोऽन्यत्राप्यप्रतिबन्धपुष्कलकारणक्रमोपनिपातादवयवविश्लेषाच्च सुसदृशनिरन्तरप्रवृत्तप्रदीपप्रवाहालम्बनेव तथा मतिरिति निश्चीयते ,तथैकं नाना-

त्वप्रत्ययः स्वतःप्राप्तेन्द्रियवृत्तिविपर्ययप्रयुक्तः समसमयोपजायमानानेकानवद्यप्रत्यक्षप्रतिक्षिप्तविषयश्च द्विचन्द्रादौ दृष्ट इति नासौ तत्रैकत्वानुमानमभिभवितुं प्रभवति, न चैवमिह ज्ञातृज्ञानज्ञेयविवेकसाक्षात्कारी प्रत्यय इति प्रतिरुणद्ध्येवास्मिहाभेदानुमानोदयप्रसक्तिम्। न चोपलब्धिसाहित्यनियमादेव तथात्वमत्रानुमेयमिति युक्तं विपक्षे बाधकानुपलब्धेः संविदधीनसिद्धितयाऽपि तथा नियमोपपत्तेः, अनैन्द्रियकत्वेन च तद्वृत्तिविपर्ययस्याकिंचित्करत्वात् योग्यानुपलम्भपराहतत्वाच्च बाधकप्रत्ययस्य, अपि च विषयसिद्धिर्हि संवित् सा च स्वयंप्रकाशेत्यविवादः तेनावर्जनीयस्तथा नियमः, न च भेदोऽपि सिद्धिमन्तरेण सिध्येदित्यनुन्मत्तेन युक्तमापादयितुम् इत्यलमनेनानुभवपराहतमतातिव्याकुलीकरणेन, अप्रकाशात्मनश्च नीलादेः प्रकाश इत्यनुभवसिद्धत्वान्न समर्थनान्तरं प्रार्थयते, आत्मा तु प्रकाशस्वभाव एव न च तावता ज्ञानत्वं स्वतन्त्रत्वात् परतन्त्रमागन्तुयावदर्थेन्द्रियसन्निकर्षादिकारणसन्निधानमवतिष्ठमानमर्थावच्छिन्नरूपंज्ञानमिति प्रागेवावोचाम। आत्मा तु स्वतन्त्रोज्ञाताऽहमिति प्रत्यात्मं प्रथते। यदि पुनरीदृशोऽप्ययमन्याधीनसिद्धितया ज्ञानमभिलप्यते अभिलप्यतां कामं, तथापि ज्ञानवदेवेदं ज्ञानं न ज्ञप्तिमात्रं तथा, अत एव हि छन्दोगाः अथ यो वेदेदं जिघ्राणीति स आत्मा इत्याद्यामनन्ति तथा कतम आत्मेति प्रश्नपूर्वकमिदमेव लक्षणमामनन्ति वाजसनेयिनः। योऽयं विज्ञानमयः प्राणेषु हृदयन्तर्ज्योतिः पुरुष इति अत्र हि योऽयं सर्वलोकानुभवसिद्धो विविधविषयवेदनप्रचुरः प्राणेषु प्रेरकतया स्थि-

तो हृदयायतने अन्तर्ज्योतिरुक्तमिति प्रत्यक्त्वेन प्रकाशते स पुरुष इति यथोदितमेवात्मस्वरूपमुपदिश्यते एष हि द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुष इत्यार्षवर्णाः, तथा विज्ञातारमरे केन विजानीयादिति, न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् स उत्तमः पुरुषः नोपजनं स्मरन्निदं शरीरम् एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति तस्माद्वा एतस्मान्मनोमयादन्योऽन्तर आत्मा विज्ञानमयः इत्यादयाः सत्यं ज्ञानम् इत्यत्रापि ब्रह्मलक्षणनिर्देशे ज्ञान--शब्दो न ज्ञानमात्रवचनः अपि तु तद्वचनः तद्वचनत्वे लिति इति आद्युदात्तत्वप्रसक्तेः, अन्तोदात्तश्चायं ज्ञानशब्दः, मत्वर्थीयाच्प्रत्ययान्तत्वे तथात्वं घटते नान्यथेत्येतत् परमात्मनिरूपणे अतिनिपुणमुपपादयिष्यामः। ऐतरेयकोपनिषदपि प्रज्ञानं ब्रह्म इत्युक्ता स एतेन प्राज्ञेनात्मना इति प्रकृष्टज्ञानवन्तमेवेश्वरं दर्शयति तस्मिन्नं ज्ञातैवायमात्मेति। किं पुनरस्मिन् देहादिव्यतिरेकिणि चेतने प्रत्यगात्मनि प्रमाणम्। अनुमानमिति नयविचक्षणोऽक्षपादः यदाह--इच्छाद्वेषसुखदुःखज्ञानान्यात्मलिङ्गमिति किममीषामात्मना अविनाभावो दृष्टः धूमध्वजविशेषेणेव धूमविशेषस्य, हन्तैवं तत एव तत्प्रमितेः किमनुमानेन, मा भूद्विशेषतो दर्शनं सामान्यतस्तु भविष्यति तथा हि इच्छादयः कार्यत्वानित्यत्वगुणत्वादिभिः शब्दादय इवाश्रितत्वेनाऽनुमीयन्ते यस्यैषामाश्रयः स आत्मा, गुणत्वं च परिशेषात् न सामान्यविशेषसमवायभावः अनित्यत्वात्, न द्रव्यं कर्म वा व्यापकद्रव्यसमवायादिति विशेषगुणत्वं

चानित्यत्वे सत्यस्मदाद्येकेन्द्रियग्राह्यत्वनियमाद् रूपादिवत् एवमाश्रयमात्रमुपस्थापयन्तोऽन्वयव्यतिरेकिणो हेतवः द्रव्यान्तरगुणत्वं प्रत्याचक्षाणैः केवलव्यतिरेकिसाधनैरात्मगोचरतया निरस्यन्ते। तथा हि भवति--इच्छादयो न महाभूतगुणाः स्वात्मन एव प्रत्यक्षत्वात् अबाह्येन्द्रियग्राह्यत्वाद्वा ये भूतगुणास्ते स्वात्मपरात्मप्रत्यक्षा बाह्यकरणप्रत्यक्षाश्च यथा रूपादयः न तथा इच्छादय इति न तद्गुणाः, दिक्कालमनांसि पुनर्न विशेषगुणवन्ति, नापि तद्गुणानां प्रत्यक्षत्वमिति न तेषामपि गुणाः अकारणगुणपूर्वत्वात् अयावच्छरीरभावित्वादित्यादयः शरीरविशेषगुणत्वप्रतिषेधहेतवः प्राचीनाश्च अत्रानुक्रष्टव्याः तेन इच्छादयो न शरीरगुणास्तद्गुणभावापवादकप्रमाणवत्त्वे सति गुणत्वात् ये यथोक्तसाध्या न भवन्ति ते यथोक्तसाधना अपि न भवन्ति यथा रूपादयः यथोक्तसाधनाः पुनरिच्छादय इति यथोक्तसाध्या एवेति, विमतिपदास्पदेभ्यः शरीरादिभ्योऽर्थान्तरगुणा इच्छादय इति वा प्रतिज्ञा यथोक्त एव हेतुः उदाहरणं च प्रयोक्तव्यं सामान्येन वाऽन्वयः प्रदर्शनीयः यो यद्गुणाभावापवादकप्रमाणवत्त्वे सति गुणः स ततोऽर्थान्तरस्य गुणः यथा पृथिव्यादिभ्यः शब्द इति आकाशसिद्धिवदात्मसिद्धिरिति इदमपि न समीचीनमित्येके, तथा हि अन्वयव्यतिरेकिहेतुभिर्देहादिसाधारणमाश्रयमात्रमवगमितं, न च तावताऽऽत्मसिद्धिः केवलव्यतिरेकी तु साधनदृशामेव नास्तादयति सपक्षान्वयविरहादसाधारणवत्, न चैवं केवलान्वयिनो विपक्षव्यतिरेकदर्शनविकलतया साधारणवदसाधनत्वं देशकालादिशङ्कितोपा-

धिविगमेऽप्यन्वयदर्शनेन साध्यान्वितस्वभावतया परिनिश्चितत्वात्, न च साधनाभावे साध्याभावदर्शनमात्रेण साध्यान्वितस्वभावत्वं शक्यं निश्चेतुम् अभावस्यानन्तदेशव्यापितया अनवयवेन ग्रहणस्यैव दुष्करत्वात् कालयाऽप्यन्यत्र वृत्तौ संबन्धे नियमासंभवात् संदेहग्रस्तत्वाच्च किं साधनाभावप्रयुक्तः साध्याभावः किं वा निमित्तान्तरप्रयुक्त इति पृथिव्यादिभ्योऽर्थान्तरगुणत्वप्रतिज्ञापि द्रव्यान्तराप्रसिद्धेरप्रसिद्धविशेषणा एतेन सांख्योदीरितसाधनभेदा अपि अपोदिता वेदितव्याः संघातपरार्थत्वादयः, तथा च तानेव तावदादितो व्याकुर्महे।

संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च ॥

अयमर्थः देहेन्द्रियादयः परार्थाः संघातत्वात् शयनासनशरणादिवत् प्रत्यक्षं च शरीरस्य संघातत्व भूतानां चाव्यक्तमहदहङ्कारेन्द्रियाणां च सुखदुःखमोहात्मतया तथात्वमनुमेयं तद्वदेव, न चेन्द्रियाणामाहङ्कारिकत्वस्याभ्युपेतस्य साध्यत्वाभिमतपारार्थ्यधर्मस्य चासंहतपरार्थत्वस्यान्यथात्वापादनादुभयविशेषविरुद्धत्वं हेतोः अहंकारान्वयव्यतिरेकानुविधानेन देवा वैकारिकाः स्मृताः इत्यादागमबलेन प्रकाशलाघवगुणान्वयेन च वैकारिकाभिधानसात्त्विकाहङ्कारभेदयोनित्वस्येन्द्रियाणां प्रमाणसिद्धस्यापवादानुपपत्तेः । आत्मनस्तु संघातत्वे तस्यापि संघातान्तरार्थतयाऽनवस्थापत्त्या निष्प्रमाणकानेककल्पनाप्रसङ्गात् अप्रयोजकत्वाच्च संघातत्वस्य शेषित्वे दृष्टान्तदृष्टाशेषधर्मोपस्थापनेऽनुमानप्रामाण्यस्यैवासंभवापत्तेः, तदसंघातत्वस्य चाप्रच्याव्यत्वा-

त्, न च प्रमाणान्तरबलेनाहङ्कारिकत्वसंघातान्तरार्थत्वयोर्बाधे अबाधितेन संघातपरार्थत्वेनापि न भवितव्यम्, एवं च संहतत्वव्यापकावयवत्रैगुण्यादिरहितोऽसंहत आत्मा सिद्धस्तया देहादयः सुखदुःखमोहात्मकतया परेणाधिष्ठीयन्ते यन्त्रादिभिरिव रथादयः । अपि चानुकूलप्रतिकूलवेदनीये सुखदुःखे भृत्यभ्रातृव्यवदनुकूलनीयप्रतिकूलनीयवती दृश्यत्वाद्देहादयो घटादय इव विलक्षणाद्दृष्टुका इति अधिष्ठातुरनुकूलप्रतिकूलवेदकस्य द्रष्टुस्त्रैगुण्यादिविपर्ययः पूर्ववदेव निर्णेतव्यः तथा देहादेरव्यक्तान्तस्य कृत्स्नस्य त्रिगुणात्मकतयाऽत्यन्तदुःखोपशमनलक्षणमोक्षदशानुपपत्तेः तदर्थं च शास्त्राणां महाधियां च प्रवृत्तेः अस्ति देहादिव्यतिरिक्तोऽसंहतस्त्रैगुण्याद्यसंस्पृष्टः पुरुष इति, अत्रापि संघातपारार्थ्यादिभिर्यद्यपि परः कोऽप्यधिष्ठाता द्रष्टा सिद्धस्तथाऽपि न तस्यासंहतत्वात् त्रिगुणत्वादिभिरभिमतविशेषः शक्यनिश्चयः, तथा हि संघातस्य संघातान्तरार्थत्वनियमदर्शनबलादापतन्ती परापरासंघातकल्पना न दोषाय कार्यतयेवानादिकारणपरम्परापरिकल्पना, न चाप्रयोजकत्वमपि असंघातस्यासङ्गस्याशेषविक्रियाशून्यस्यानाधेयातिशयकूटस्थचितिमात्रवपुषः पुरुषस्य संघातं प्रति परत्वानुपपत्तेः तद्धि तस्य शेषीभवति तच्च तदर्थं यद्येनोपक्रियते क्रियते वा यच्चोपकरोति करोति वा न च तथा सांख्यपुरुष इति कथं तस्य संघातं प्रति परत्वं कथन्तरां च संघातस्य तादर्थ्यम्। अनुपकार्योऽप्युपकार्यतया आत्मानं मन्यत इति चेत् कामं मन्यतां किमायातमुपकार्यत्वस्य, न खलु बालास्खलमलिनतादिमत्तया

गगनमभिमन्यन्त इति तस्य तथात्वं भवति, अपि च तथाविधभ्रमोऽपि कस्य कथमुदयत इति विवेचनीयम्, न तावच्चिच्छक्तेःसर्वविक्रियाशून्यतया अतिविशुद्धायामशुभशतनिदानभूतभ्रमपरिणामासंभवात्, अन्तःकरणं तु बुद्धिपरपरिभाषाभिधानमचेतनतया तनुरिव न भ्राम्यति, अचिदपि स्वच्छतया चितिच्छायामापन्नं चेतनायत इति चेन्न नीरूपायाश्चितेर्बुद्धेश्च छायातद्ग्रहणानुपपत्तेः, छायेव छायेति चेत् कः खल्विवार्थः चितिसरूपत्वमिति चेत् हन्तैवमशेषविकाररहितचितिसरूपताऽऽपत्तावन्तःकरणमपि प्रत्यस्तमितसमस्तवृत्तिकमापद्यत इति दुरुपपादतरोऽयं भ्रमसुखदुःखादिविकारयोगः प्रत्यात्मसिद्धः, चेतनत्वेन सरूपत्वमिति चेन्न चितिरेव हि ते पुरुषो न चेतयिता यथाऽऽह तव भगवान् पतञ्जलिः यदा चितिरेव पुरुषः किमत्र केन व्यपदिश्यते इति अजडायमानत्वमिवार्थ इति चेत् अजडत्वमपि न ज्ञातृत्वातिरिक्तं किंचिदित्युक्तमेव, तेनैव तद्विवरणमिति च न किंचिदेतत् । अपि च चितिसन्निधानाधानां बुद्धिसिद्धिमभिदधानः कथमिव तदजडिमानं प्रतिजानीयात् । न च चितिस्वान्तयोः विम्बप्रतिविम्बाधाराभिमतयोरन्यतरस्मिन्नप्यविद्यमानस्य विषयविशेषोपरक्तज्ञातृत्वलक्षणधर्मभेदस्य प्रतिविम्बे संभवः प्रत्युक्तश्चायं प्रतिविम्बवादः प्रच्छन्न*वाच्यमतप्रत्यादेशे । यदुच्यते निर्विकारायापि पुंसे तत्सन्निधिमहिमसमुत्थापितप्रमाणविपर्ययादिविचित्रवृत्तिभेदं स्वा-

---

* निर्विशेषचिदद्वयवादे ।

न्तमेव स्वदृत्तिं विषयविशेषाँश्चोपदर्शयति सामन्तचक्रमिव पराक्रमीयः प्रतिबलविलोलनादिदृत्तिस्वामिनं ततः साक्षी भोक्ता चापदिश्यते राजेति विक्रमी विजयी चेति, तदनुपपन्नं द्रष्टरि हि दर्शनीयं दृश्यते न च दृशिमात्रात्मवादिनां सांख्यानां तदुपजीविनां च प्रच्छन्नानां द्रष्टृत्वं वास्तवमस्ति, न च काल्पनिकेन शेषित्वसंभवः कल्पनापि न संभवतीत्युक्तमेव, राजा तु सामान्यतो विशेषतो वा तेषु कर्मस्वमात्यान्नियुञ्जानस्तत्फलमैश्वर्यादि चाश्नुवानः स्वस्वामिभावहेतुक्रयप्रतिग्रहजननादिव्यापारयोगी न निष्क्रियस्यानाधेयातिशयस्य पुंसो निदर्शनमिति यत्किंचिदेतत्, स्थूलोऽहं गच्छाम्यहमित्यादिप्रत्यक्षदृष्टविषयतया प्रसिद्धैवातीतकालता व्यतिरेकानुमानभेदानामित्यानुमानिकीमप्यात्मसिद्धिमश्रद्दधानाः श्रौतीमेव तां श्रोवियाःसंगिरन्ते, श्रुतयो हि साक्षादेवात्मनः शरीरादिव्यतिरेकमादर्शयन्ति स वा एष नेति नेति, अकायमव्रणमस्नाविरं शुद्धमपापविद्धम, योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः स्थाणुमन्ये, न जायते म्रियते वा कदाचित्, जीवापेतं वाव किलेदं म्रियते, न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः इत्यादयः कालान्तरभाविस्वर्गादिसाधनविधयश्चाचिपन्ति देहादिव्यतिरिक्तं नित्यं चेतनमिति श्रुतितदनुपपत्तिप्रमाणकोऽयं प्रत्यगात्मेति । ननु हिताहितप्राप्तिपरिहारमात्रपरस्यास्त्रायस्य शिरसि किमिति महानयं भारः प्रक्षिप्यते अनुमानागमाद्यशेषप्रमाणमूलभूतेन प्रत्यक्षेणैव ह्येनं प्रतिपद्यामहे ममेदं शरीरम् इदमहं जानामीति घटादिदृश्येभ्य इवायं द्रष्टा

देहादपि पृथग्भूतः प्रत्यक्षं परिस्फुरति, नैवं वाचः इन्द्रियार्थसन्निकर्षजं हि विज्ञानं प्रत्यक्षं, न चेन्द्रियाणि रूपादिव्यतिरेकिणि निरतिशयमूर्च्छे प्रतीचि परागर्थ इव सन्निकर्षेण ज्ञानं जनयितुमर्हन्ति यथाऽऽम्नायते पराञ्चि खानि व्यतृणत्स्वयंभूः इति,

अचित्त्वप्रतिबद्धश्च सर्वोऽपीन्द्रियगोचरः ।
तेन नैन्द्रियकं ज्ञानमात्मानं स्प्रष्टुमर्हति ॥

स्यान्मतं भौतिकत्वाद्बहिरिन्द्रियाणि मा नामात्मनि प्रवर्तिषत मनस्तु प्रवर्तिष्यते अभौतिकत्वादिति तन्न तस्यापीन्द्रियत्वे भौतिकत्वस्यापरिहार्यत्वात् यथाऽऽम्नायते अन्नमयं हि सोम्य मन इति, प्रपञ्चितं चैतन्निरूपणे अथोच्येत अस्ति तावदहमित्यपरोक्षावभासः प्रत्ययः न चेन्द्रियकत्वमन्तरेणामौ संभवति क्लृप्तं च बहिरिन्द्रियागोचरेऽपि सुखादौ स्वान्तस्वातन्त्र्यमिति तन्निमित्त एवायमहंप्रत्ययो युक्तः, प्रयोगश्च भवति आत्मा मानसप्रत्यक्षग्राह्यः बहिरिन्द्रियायोग्यत्वे सति प्रत्यक्षत्वात् सुखादिवदिति तन्न संवेदनेन व्यभिचारात्, न च तदप्रत्यक्षं जानामीत्यनन्योपाधिकतया प्रतिभानात् अप्रत्यक्षत्वे च संवेदनस्यासिद्धिरेव स्यादित्युक्तमेव । न च तदपि मानसप्रत्यक्षतया सपक्षे निक्षेपमर्हति विमर्शसहत्वात् यदा खलु कुतश्चिदात्ममनःसंयोगाद्विषयसंवित्तदयमासादयति तदैव किं तत एव तद्गोचरमपि वेदनं जन्यते उतान्यदान्येनेति वाच्यम् न च युगपदुभयजननं संभाव्यते तथा हि सति परापरतत्तद्गोचरनिरवधिकधीनिकुरुम्बजन्मतत्कालमेवापद्येत । न च तदस्ति युगपदुत्पत्तौ विषयविषयित्वनियमश्च निर्निबन्धनः असमसमयजन्मना ज्ञा-

नेन वेदात्वेन प्रत्यक्षत्वं क्षणिकत्वेनाग्रिमज्ञानस्याग्राह-कज्ञानोदयमवस्थानाभावाद्, भावे च सर्वज्ञानानां सर्व-दाऽवस्थानप्रसङ्गात् कार्यविरोधित्वे चानन्तरमेव संस्का-रोदयान्न कालान्तरे स्थितिरिति संविदो न मानसप्रत्य-क्षवेदात्वं, न चाप्रत्यक्षा संविदिति स्फुटो व्यभिचारः, ऐ-न्द्रियकत्वमज्ञानात्मत्वप्रतिबद्धत्वादिरुद्धता च,साध्यविक-लश्च दृष्टान्तः सुखदुःखयोः प्रत्यक्षत्वानभ्युपगमात्, अन भ्युपगमश्च इन्द्रियपौष्कल्यनाशयोरेव सुखदुःखत्वात्,न हि तच्छिन्नप्रत्यक्षे तत्पौष्कल्यं वैकल्यं वा प्रत्यक्षं भवति इन्द्रिय-स्वरूप इव अभ्यासपाटवात्तयोरपरोक्षत्वाभिमानः म-नोऽवस्थाभेदेष्विव चानुमेयमनोवादिनाम् वस्तु सुगतम-तावलम्बी विज्ञानाभिन्नहेतुजतया तयोरपि तदन्तर्भा-वमभिमन्यते क्षणभङ्गपक्षाश्रयणेन वा तयोरात्मविशे ष-गुणत्वं ताभ्यां सुखदुःखादिकरणं व्याचक्षीत स्वतःसु-खीत्येतद्विमर्शं वा ऽक्षत्यम्। रागद्वेषादयस्तु चैतन्यस्यैवा-वस्थाविशेषास्तद्वदेव प्रत्यक्षीभवन्तीति न तन्निदर्शनेना-नुमानोदयः सुखप्रयुक्तविषयीकारचैतन्यं रागः तद्विरो-धिप्रयुक्तविषयीकारं तदेव द्वेषः भूतदुःखज्ञानेन तच्चलनं शोकः, आगामितज्ज्ञानेन चेतश्चलनं भयम्, इत्यादिल-क्षणग्रन्थादेवावगन्तव्यमित्यलं प्रविस्तरेण। एक-स्यचात्मनो निरङ्कुशस्य न स्वापेक्षया ग्राह्यग्राहकभावः विरोधादित्यप्युक्तमेव अंशभेदाश्रयणे तच्छिद्रये चांशा-न्तरमाश्रयितव्यं तथा तत्र तत्रेत्यनवस्था, संघातत्वं चा-त्मनः। ननु च ग्राहकावभासश्रुत्या स्वसिद्धान्तश्रद्धा वि-प्रलब्धबुद्धिभिरभिहित इन्द्रियादिप्रत्यासन्नतत्तत्पदार्थ-मात्रस्फुरणात् तादृशोऽपि क्वचिदस्तु नाम प्रत्ययः स-

त्वागन्तुकात्मप्रतियोगिकप्राकट्यप्रकाशादिपदाभिधेयार्थधर्मानुमितज्ञानविशिष्टमानसप्रत्यक्षसिद्धात्मनिबन्धनः उच्यते अहो खलु स्वानुभव एव विभ्रमः परीक्षकाणाम् यद्विषयानुभवसमये पूर्वावस्थातो न कंचिद्विशेषमयमात्मनोऽवबुध्यत इति उक्तं ह्येतत् ईदृश एवायमर्थः ज्ञायते न वेति न विद्मः मम वा प्रतिभासते परस्य वेत्यपि न विद्म इति न जातुचिदेव प्रतीतिरस्ति ज्ञानज्ञात्रोरनवभासे तादृश्यपि प्रतीतिरापद्येतेति सोऽयं परसंचेतितात्स्वसंचेतितस्यातिशयः सर्वत्र परिस्फुरन् असति ग्राहकावभासे नोपपद्येत अनुमितज्ञानावलम्बनत्वे चाज्ञासिषमित्येव प्रतिभासः स्यात् न जानामीति ज्ञानजन्यार्थातिशयदर्शनतद्व्याप्त्यनुसंधानानुमानोदयसमयेऽनुमित्सितज्ञानस्यातिवृत्तत्वात् ज्ञानानुमानासंभवः पूर्वमेवोक्तः, मानसप्रत्यक्षत्वं चात्मग्राह्यधीनिरस्तं तथा सति हि स्वपरवेद्ययोरनतिशयः स्यात् । ननु कथमिव ग्राहकानवभासे स्वपरवेद्ययोरनतिशयप्रसङ्गः, न हि ग्राहकसिद्धिनिबन्धनः स्वपरवेद्याविशेषः स्वसमवेतविषयबोधजन्मना परसमवेतबोधजन्मना च तद्विशेषोपपत्तेः स्वपरसंबन्धिबोधविशेषोदयव्यवस्थाऽपि स्वीयपरकीयेन्द्रियार्थसन्निकर्षादिज्ञानहेतुसामग्रीभेदनिबन्धना । न चात्मसिद्धिरपि तत्सामग्र्यनुप्रवेशमर्हति इन्द्रियादेरिवानवभासमानस्यैव हेतुत्वसंभवात् न च विषयबोध एवात्मबोध इति सांप्रतम्, न ह्यर्थान्तरसिद्धिरर्थान्तस्य सिद्धिर्भवति अतिप्रसङ्गात्, अपि च यदधीना भावानां रूपभेदव्यवस्था तदपि हि संवेदनं तदानीं निलीनरूपमेव इन्द्रियादिवत् कुतस्तु पुनस्तदाश्रयस्यात्मनः प्रतिभासप्रसक्ति-

यदाहुः इदमहं जानामीति त्रितयाऽवभासः सार्वत्रिक इति, तदप्यनुभवानारूढमेवानन्तरमेव प्रतिक्षिप्तमिति, अस्तुतर्हि ग्राहकतयैव सर्वार्थग्रहणसमयेष्वात्मसिद्धिः अभ्युपगन्तव्या हि संविदः स्वतःसिद्धिः सर्वप्रकारसाधनान्तरनिराकरणात् सत्याश्च तस्याः कदाचिदनवभासादर्शनाच्च, यथा च संविदः प्रकाशाव्यभिचारस्तथा प्रपञ्चितं प्रथमाधिकरण इति नात्रोपक्षिप्य प्रतिक्षेप्तव्यम्। सतोऽपि प्रमेयजातस्य स्वापादिसमये अनुपलब्धेरभ्युपगतं तावत्संविदस्तत्साधकत्वम् अतः कृप्तार्थान्तरसाधनभावया तयैवात्मनोऽपि सिद्धिरभ्युपगन्तुं न्याय्या। यत्तु विषयविच्युपरमेऽपि स्वापसमये अयमात्मा प्रकाशत इति तदुपपत्तिभिरुपपद्यमानमपि यथाप्रतीति व्यवहरतां न चित्तमनुरञ्जयति।

अपवृत्तस्य तु ज्ञानं हेत्वभावान्न संभवि।
नित्यत्वे नित्यमुक्तिः स्यादर्थवादास्तथोक्तयः॥

निर्धूतनिखिलकरणकलेवरज्ञानकर्मवासनानुबन्धस्यापवृत्तस्य न खलु स्वपरसंवेदनोदयनिबन्धनं किंचित्संभाव्यते, न च मनसो नित्येन्द्रियत्वेन तत्संयोगादेव तदा ज्ञानं जन्यत इति युक्तम् स्वरूपतो गगनवन्नित्यस्यापि सतस्तस्येन्द्रियभावेन ज्ञानोत्पादकत्वस्य धर्माधर्मावरोधनिबन्धनत्वात्

धर्माधर्मावरुद्धं सन्मनोज्ञानस्य साधनम्।
सति नित्येन्द्रियत्वेऽपि श्रोत्रवत्करणत्वतः॥

ननु योगजधर्मानुगृहीततत्संयोगस्य साधनत्वं, क्षीयन्ते चास्य कर्माणि, तदा विद्वान् पुण्यपापे विधूय निरञ्जनः इत्यादिशुक्लेतरसकलकर्मप्रक्षयश्रुतिविरोधात् धर्मफलत्वे चापवर्गस्य पुनरावृत्तिप्रसङ्गः नास्य-

कृतः कृतेन, तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते इत्यादिश्रवणाच्च, न चात्मसत्तयैव तदानीं तज्ज्ञाननिमित्तमिति वाच्यम् कृतप्रणाशाकृताभ्यागमप्रसक्तेः तन्नाशनिमित्तत्वे च सर्वदा आत्मनि स्वरूपवत् तदपि विद्यत इति संसारानवतारप्रसङ्गात् बन्धमोक्षावस्थयोरविशेषापत्तेश्च। न च देहेन्द्रियादिप्रतिबद्धतयेदानीं तदभाव इति वाच्यं तत्खलु प्रतिबन्धकं यत्सति पुष्कलकारणे कार्योदयं निरुणद्धि न चादृष्टात्मनस्तत्पुष्कलकारणत्वं सिद्धं शरीरेन्द्रियवतामेव ज्ञानदर्शनात्, कृतज्ञानकारणाभावस्य तस्यैव तद्बन्धकत्ववचनमुन्मत्तवचः, अतो नास्त्यपवर्गदशायां ज्ञानं, तात्कालिकज्ञानसुखादिवादास्त्वात्मज्ञानविधिशेषतया गुणवादेन नेतव्याः, अतो विषयवित्तिसमय एवात्मसिद्धिर्नियमादयोक्तनीत्या अर्थवित्तिषु वेदितृतयैवात्मसिद्धिरिति इदमयात्मतत्त्वापरिज्ञानोल्लसितपरिमितमतिविकल्पजल्पितमिति न रोचयन्ते व्यभ्रान्तधियः, विषयवित्तिर्हि विषयवित्तिरेव, न हि तया आत्मवित्तिः स्वरूपं वा सेद्धुमर्हति अतद्विषयत्वात् यो हि यत्संविद्विषयो न भवति नासौ तया सिध्यति रूपसंविदेव रसः, अविषयौ च विषयवित्तेर्बुद्धिबोधाविति तावपि न तया सिध्यतः। ननु वेदास्वभावोऽयं यत्स्वविषयसंविदा सिध्यतीति वित्तिस्तु वित्तिरेव वेदिता च वेदितैवेति कुतस्तयोर्वेदस्वभावानुप्रवेशः, उक्तं हि तयोर्मानसप्रत्यक्षागोचरत्वमनुमेयत्वासंभवश्च, कुतस्तर्हि वित्तिसिद्धिः स्वतन्त्रैव स्वयंप्रकाशा हि संवित्, नैवं सापि हि विषयवदेवान्यस्यैव प्रकाश्यमानतया न स्वतःसिध्यति, स्वतःसिध्यन्ती च सा

किमिति कंचिदेव प्रति चकास्ति, न सर्वान्प्रति, तत्समवायादिति चेत् यत्समवायिनो हि या संवित् तस्यैव सा चकास्ति नेतरस्य तदसमवायादिति यदेवमाश्रितस्तर्हि आत्मसंबन्धनिबन्धन एव संविदः प्रकाशः तत्स्वभावाभावानुविधानात्, यद्युच्येत प्रकाशस्वभावाया एव सत्याः प्रतियोगिविशेषावच्छेदायैव तदपेक्षा न स्वरूपसिद्धये इति कुतः खल्वयं निश्चयः, यदि हि प्रतियोगिनिरपेक्षैव कदाचिदात्मस्वरूपमिव संवित्प्रकाशेत तत एवमध्यवस्येमापि न च तथाऽस्ति आश्रयप्रतियोगिसापेक्षैव संयोगपुत्रत्वादेरिव तस्याः स्वरूपसत्तेति न पृथक्सिद्ध्युल्लेखावकाशस्तस्याः संविदः प्रकाशव्यभिचाराभावात् स्वरूपप्रयुक्तः प्रकाश इति चेत् सत्याः किं तस्याः आत्मसंबन्धव्यभिचारोऽस्ति अपि चैवं सुखदुःखादयोऽपि त्वन्मते स्वतःसिद्धाः स्युः न हि तेऽपि सन्तो न प्रकाशन्ते अथार्थान्तरसाधकतया सर्ववादिसंमतायाः संविद एव परं स्वयंप्रकाशत्वमाश्रितम्, तथैव तथाभूतया तदितरवाह्याभ्यन्तरसकलपदार्थसिद्ध्युपपत्तेः किमनेकस्वयंप्रकाशभावाभ्युपगमेनेति भावः तथा सति।

सर्वस्यार्थस्य तद्वित्तेः साक्षी सर्वत्र संमतः।
आत्मैवास्तु स्वतःसिद्धः किमनेकैस्तथाविधैः॥

किंच।

यो यस्य साक्षी तेनैव तस्य सिद्धिर्न लौकिकी।
अर्थस्यैवार्थवित्तेरप्यात्मा साक्षी हि लक्ष्यते॥

सन्तु नामार्थवित्तयः स्वतःसिद्धाः तथाऽपि न ताभिरयमात्मा प्रत्यक्षीभवति तत्साक्षित्वात् यत्साक्षी खल्वयं पुरुषः न तेनासौ प्रत्यक्षः घटसाक्षात्कारीव घटेन, अर्थ-

संविदां च साक्षात्कारी चेतन इति सोऽपि न ताभिरपरोक्षीभवति ।

सजातीयस्वसाध्यार्थनिरपेक्षात्मसिद्धयः ।
सर्वे पदार्थास्तेनात्मा निरपेक्षस्वसिद्धिकः ॥

न हि कश्चित्पदार्थः स्वप्रकाशायासाधारणसजातीयार्थान्तरापेक्षो दृष्टः, न खलु घटः स्वसिद्धये घटान्तरमपेक्षते, अपेक्षते तु विजातीयमालोकादि, एवमालोकोऽपि प्रकाशमानो नालोकान्तरमपेक्षते नापि स्वापेक्षप्रकाशं घटादिकमपेक्षते, अपेक्षते तु विजातीयमिन्द्रियम् एवमिन्द्रियमपि नेन्द्रियान्तरं स्वापेक्षप्रकाशम् आलोकादि घटं वापेक्षते, अपेक्षते तु विजातीयं संवेदनमेवं संवेदनमपि संविदन्तरं स्वाधीनसिद्धिकमिन्द्रियादिकं वा नापेक्षते स्वसिद्धौ, अपेक्षते तु विजातीयं स्वाश्रयभूतं स्वतन्त्रमात्मानम्, एवमात्माऽप्यात्मान्तरं स्वाधीनसिद्धि संविदिन्द्रियादिकमपि स्वापरोक्षे नापेक्षते इत्यनन्यापेक्षा ह्यात्मस्वरूपसिद्धिः ।

तदेवं चित्स्वभावस्य पुंसः स्वाभाविकी चितिः ।
नानापदार्थसंसर्गात्तत्तच्चित्तत्वमश्नुते ॥

यथैव खलु सूर्यालोकस्तेन तेनार्थभेदेन संसर्गात्तत्तत्प्रकाशो भवति घटप्रकाशः पटप्रकाश इति एवमात्मनः प्रकारभूतं चैतन्यमर्थविशेषसंसर्गाद्घटसंवित्पटसंविदित्यादिप्रख्योपाख्ये प्रतिपद्यते ते च चैतन्यस्य दशाविशेषाश्चेतयितुरात्मनोधर्मविशेषत्वादेव तस्यापरोक्षा भवन्ति कादाचित्कबोधवादिनामिव बोधस्य विषयभेदावच्छेदादयः ननु आत्मनश्चैतन्यमागन्तुकमिति न्यायवैशेषिकविदस्तन्मतोपजीविनश्चाभिनवमीमांसकाः अर्थेन्द्रियसन्निक-

र्षादन्वयव्यतिरेकानुविधानाद् गच्छाम्यागच्छामीत्यादि-
दिवज्जानामि अज्ञासिषमित्यादिकालावच्छेदप्रतीतेः स्वा-
पतुरीयादिदशासु च बोधाधारत्वे सुप्तप्रबुद्धवद्मुक्तादि-
व्यवस्थाऽभावप्रसङ्गाच्च, नित्यस्य च ज्ञानस्यात्मसमवायिनः
प्रतिकर्मव्यवस्थाऽपि दुरुपपादैव तदा हि प्रकाशनशील-
तया तस्या एकस्यां संविदि सर्वमेव प्रकाशेत न वा किं-
चिदविशेषात् अन्यदा तु यदर्थसन्निकर्षजुषा इन्द्रियलि-
ङ्गादिना या धीर्जन्यते तदीयैव सेति व्यवस्था युक्तिमती,
स्यान्मतम् इन्द्रियादिप्रणाडिकया चैतन्यमेव तेनतेनार्थे-
नानुरज्यमानं तत्प्रकाशतया तदीयत्वेन व्यवतिष्ठते, अनु-
रागस्य चागन्तुकतया इन्द्रियादयनुविधानं कालावच्छेद-
स्वापादिव्यवस्था चोपपद्यत इति तदसत् अर्थान्तरस-
न्निकर्षे अर्थान्तरस्यानुरागासंभवात् चैतन्यमपि तथा
निष्क्रम्य सन्निकृष्यत इति चेन्न अमूर्तस्याकाशस्येव नि-
ष्क्रमणप्रवेशाद्यनुपपत्तेः, गुणश्च चैतन्यं गुणिनमपहाय
कथमन्यतो यास्यति, न चार्थोऽन्तः प्रविशति स हि व-
हिर्देशसंबद्धः सर्वलोकप्रत्यक्षः। जात्यादिषु चानुपपत्ति-
स्तुल्यैव, अथोच्येत द्वेधा खल्वयं प्रत्यगर्थोऽवतिष्ठते बहलो
विरलश्च तत्र बहलः प्रत्यक्चेतनचेतज्ञादिपदपर्याय आ-
त्मा विरलस्तु चैतन्यज्ञानादिपदाभिधेयः प्रत्यगर्थतन्मत-
या गुण इत्युपचर्यते तेजोवत्, यथा बहलस्तेजःप्रदीपोऽग्नि-
रिति विरलं तु प्रभा ज्योतिरिति अतो विरलात्मप्रदेश-
तया चैतन्यस्यालोकस्येव गमनं संयोगादिकमुपपद्यत
इति इदमनुपपन्नम् निरवयवस्यामूर्तस्यासङ्गस्या-
त्मनो बहलविरलादिधर्मानुपपत्तेः, यदि हि सावयवत्व-
मूर्तत्वानित्यत्वसंसर्गित्वादिकमपि धर्मजातमात्मन्यनुम-

ब्वीमहि तत एवमङ्गीकुर्वीमहि, न च तदनुमन्तुमुचितमचेतनत्वापातादित्यलमनेनार्हतमतानुकारदूषितेनात्मवादेन । अथ मतमात्माऽयमनवयवेन सर्वतः सर्वार्थावभासनसमर्थश्चैतन्यानुबन्धः सर्वव्यापी, अथ च न सर्वमस्य परिस्फुरति तमोगुणप्रतिबन्धात्, सत्त्वोत्कटैस्तु करणैः स्वकस्वकपाटवानुसारेण, पाटिते तु तमसि तेतेऽर्थाः प्रतिभासन्ते अतोऽन्तरेणापि ज्ञानार्थयोर्निष्क्रमणप्रवेशावुपपद्यते एवार्थविशेषोपरागः संविद इति, एवमप्यर्थातिशयमात्रहेतुत्वादिन्द्रियलिङ्गादेर्ज्ञानस्येव ज्ञापकत्वं न स्याज्ज्ञानहेतुत्वाभावात्, न चार्थप्रकाशस्य ज्ञानत्वं प्रकाशमानतयाऽर्थस्यापि ज्ञातृत्वप्रसङ्गात् यदाहुः आत्मधर्मस्य चैतन्यस्य विषयेण संयोगो ज्ञानमित्युच्यत इति, तत्रापि संयोगस्योभयनिष्ठतया स एव प्रसङ्गोऽनुभवविरोधश्च, अहमिदमिदानीं जानामि नेदानीमित्यात्मसमवायिनोरेव ज्ञानभावाभावयोरनुभवात्, अविद्यतप्रकाशहेतुकिरणसंहतावप्यहिममहसि प्रकाशकत्वप्रख्यापाख्यानवदुपपद्यत इति मा वोचः तत्र हि गभस्तीनां द्रव्यतयाऽऽकुञ्चनप्रसारणद्रव्यान्तरसंयोगविभागादेः संभवादुपपद्यते व्यवस्थोपलब्धिः चैतन्यं तु गुण इति न तथा व्यवस्थामर्हति । अथोच्येत द्विधा हि ज्ञानमात्मनः स्वस्मिन्नन्यत्र च तत्राद्यमुदयास्तमयरहितमात्मस्वरूपप्रयुक्तमनवरतमनुवर्तते इतरत्तु तत्तदर्थसंबन्धीन्द्रियाद्यागन्तुकहेतुभेदायत्तात्मलाभं तद्भावाभावानुविधायितत्तदर्थप्रकाशतयोदीयते लीयते च, तदपेक्षयैव स्वापजागराद्यवस्थाव्यवस्थापि सङ्गंस्यत इत्युच्यते अभ्युपगच्छेमाप्येवं यदि नित्यमात्मनि ज्ञानमस्तीत्यत्र

L-1947

किमपि साधनमुपलभेमहि। ननु अङ्गीक्रियतस्तावज्जाग्रदवस्थायां सर्वदाऽऽत्मानुभवः स्वापादिषु चानुमीयते तात्कालिकस्य विषयज्ञानाभावस्योत्तरोत्तरकालं परामृश्यमानत्वात् यत्कालीनो भावः परामृश्यते तत्कालीनेन तदाश्रयस्वरूपज्ञानेनापि हि भाव्यं मध्याह्नकालपरामृश्यमान इव प्रातःसमयपरिदृष्टतटाकतीरादिदृत्तिनिकुञ्जराद्यभावे यत्कालीनाभावाश्रयतया यः परामृश्यते सः तत्कालीनस्वरूपानुभववान् यथा प्रानुभूततटाकतीरादि स्वापादिकालिकार्थानुभवाभावाश्रयतया चायमात्मा परामृश्यते, अतस्तात्कालिकस्वरूपानुभववानिति, मैवम् अनैकान्त्यात् प्रातस्तत्र नाहमासमिति स्वाभावभूमितया प्रतीतेन प्रातरनवगतगिरितटाकादिना अभावप्रतिपत्तिसमये प्रतिपित्सितभावसमकालवर्तिनस्तदाश्रयस्वरूपस्य अवगत्या विद्यमानत्वे तत्कालतयाऽवगमप्राप्तस्य प्रतियोगिनोऽनवगत्या च भवितव्यमभावज्ञानस्येत्येतावत् अन्तरेणापि स्वापकालीनमात्मानुभवमिह तदुभयमुपपद्यते प्रत्यभिज्ञयैव प्रबोधे स्वरूपसिद्धेः जाग्रदनुभवस्येव पटीयसः स्वापेऽपि सतोऽनुभवस्य स्मर्तव्यस्य सतस्तदानीमस्मरणाच्च सुखमहमस्वाप्समित्यादिदृत्तयश्च तात्कालिकदेहेन्द्रियलाघवपाटवादिपर्यालोचनपूर्विकाः न स्मृतयः जातिवेषसंस्थानादिष्विव तेऽपि हि परामृश्यन्ते एवंजातीयोऽहमीदृशेन वेषेणानेन संस्थानेनाव इयन्तं कालमस्वाप्समिति। अपि च स्मृतिलेऽपि जाग्रदवस्थायामिव निद्रालक्षणाया प्रमाणविपर्ययादिदृत्त्यभावकारणतमोगुणालम्बनया प्रतीत्या तत्कालप्रसिद्धस्यात्मनः स्मरणं न तु सहजसं-

वेदनसिद्धस्य स्वप्रकाशस्य वा प्रमाणाभावात् निद्रापि प्रमाणविपर्ययादिवद्वृत्तिविशेष इति तत्र भवान् पतञ्जलिः यदाह अभावप्रत्ययालम्बना वृत्तिर्निद्रा इति प्रयोगश्च विमत्याक्रान्ताऽऽत्मस्वरूपसिद्धिः विषयानुभवनिबन्धना आत्मस्वरूपसिद्धित्वात् जाग्रत्स्वप्नसिद्धिवत् इति तथाऽऽगन्तुकं ज्ञानम् आत्मविशेषगुणत्वात् सुखादिवत् न च सुखदुःखादयो नात्मगुणाः अप्रसिद्धाश्रयान्तरत्वे सत्यहंप्रत्ययसामानाधिकरण्येन प्रकाशमानत्वात् ज्ञानवदिति

अत्राहुरात्मतत्त्वज्ञाः स्वतश्चैतन्यमात्मनः ।
स्वरूपोपाधिधर्मत्वात्प्रकाश इव तेजसः ॥
चैतन्याश्रयतां मुक्त्वा स्वरूपं नान्यदात्मनः ।
यद्धि चैतन्यरहितं न तदात्मा घटादिवत् ॥
चितिशक्त्या न चात्मत्वमुक्तौ नाशप्रसङ्गतः ।

बुद्धिसुखदुःखादिनिःशेषवैशेषिकात्मगुणात्यन्तिकोपरमलक्षणो हि मोक्षः कणभक्षाक्षचरणमते न चात्यन्तलुप्तकार्यं वस्तु तत्कार्यजननशक्तमित्यत्र किंचित्प्रमाणं क्षमते, देहादिविशिष्टसंबन्धितया दृश्यमानसुखदुःखज्ञानादिकार्यं विशिष्टवर्तिनोमेवात्मोत्पादशक्तिं कल्पयति धूम इवार्द्रेन्धनसंबन्धिनि धूमध्वजे स्वोत्पादनसामर्थ्यं बीजाङ्कुर इव च सतुषतण्डुले, अपि च बोधे सत्येवात्मनो नात्मव्यवच्छेदे संभवति कृतं तच्छक्त्याश्रयणेन, न चैवं सति बोध एव परमात्मेति युक्तं तस्याश्रयप्रतियोगिसापेक्षस्वरूपत्वात् आत्मनश्च तद्विपरीतस्वभावत्वात् साक्षाच्च चेतयितुरहमर्थस्य स्फुरणादनुभवतर्कागमबलेन चितिमत आत्मभावस्यानन्तरमेव प्रपञ्चितत्वाच्च, न च चितिमात्रात्मवादेऽपि तस्यागन्तुकविषयसंबन्धे बोधत्वमध्या-

रोध बोद्धृत्वसमर्थनं साधीयः संबन्धस्योभयनिष्ठतयाऽर्थस्यापि बोद्धृत्वप्रसङ्गात् न च कार्यकारणभाववद्व्यवस्थितत्वं तत्र जनिमतोजनयितुश्च परस्परापेक्षानियमलक्षणसंबन्धः इहापि स एवेति चेन्न अपेक्षाहेत्वभावात्किमर्थमर्थश्चैतन्यमपेक्षते चैतन्यं वाऽर्थं, सिद्ध्यर्थमिति चेत् कः सिद्ध्यर्थः न तावदुत्पत्तिः तस्या निर्ज्ञातनिमितान्तरत्वात् घटादयो हि प्रसिद्धमृद्दण्डचक्रभ्रमणादिपर्यायनिमित्तान्तरशालिनो न चितिमपि निजजननेऽपेक्षन्ते निरस्तश्च विज्ञानमात्रवादः नित्यस्यात्मन उत्पत्त्यर्थमर्थापेक्षेति सुव्याहृतम्। सिद्धिः प्रकाश इति चेत् किं भोआत्मा स्वयं ज्योतिरप्यर्थाधीनप्रकाशः यद्सौ तदर्थमर्थमपेक्षते महनीयमिदमात्मवेदित्वं, प्रकाशश्च न संविदतिरेकी कश्चिदर्थधर्मः संभवतीत्यावेदितं, संभवन्नप्यसौ न चितिस्वरूपमात्रनिमित्तः सर्वदा सर्वार्थप्रकाशप्रसङ्गात्, न हि सदा सन्निहितसमग्रकारणं कार्यं कदाचिन्नवति आगन्तुकातिशयाश्रयणे वा नामान्तरेण ज्ञानमेवाङ्गीकृतमिति तद्वानेवात्मा आयातः। नन्वेवमर्थसिद्धिव्यवस्थापकतयाऽभ्युपगतं ज्ञानमागन्तुकं क्रियारूपमिति कथं तदात्मस्वभावः तथा हि अर्थान्तरगतत्वे सति जनकद्रव्यान्तरं प्रति कार्यत्वादि केन रूपेणासाधारणो गन्तव्यदेशप्राप्त्यादिर्यं प्रत्यसाधारणस्तत्समवेतागन्तुकासाधारणगमनादिक्रियाजन्यो दृष्टस्तादृशो चार्थसिद्धिर्यं पुरुषं प्रत्यसाधारणो तत्समवेततादृशक्रियाजन्येति शक्यमनुमातुम्। मैवम् अक्रियाजन्येनाभावप्राप्तचेत्रादिस्वत्वेन चेत्रिणं प्रत्यसाधारणेन चेत्रजन्यीह्यादिस्वत्वेन चानैकान्त्यात्, न च निर्व्यापारतया चेत्रिणस्तत्राजनकत्वं व्या-

पारक्कालादिना व्यभिचारात् तद्भावभावित्वस्य चाविशेषात् तज्जीवनमेव तत्र जनकव्यापार इति चेत् ननु तच्छस्यपालनादिसाधारणमिति कथमसाधारणक्रियाजन्यत्वम् अपि चैवं सति तदेवार्थप्रकाशेऽपि जनकव्यापारोऽस्तु किमकृत्रकल्पनया सत्यपि तस्मिन्नर्थो न प्रकाशत इति चेत् स्वत्वं वा किं यथोदितं सति जीवने जायत एव व्रीह्यादिसत्ताऽप्यपेक्ष्यत इति चेत् इहापीन्द्रियादिप्रत्यासत्तिरिति समानश्चर्चः, अतो यं प्रत्यसाधारणोयथोदितधर्मस्तदीयासाधारणधर्मनिमित्त इत्येतावत् स चेष्यत एवात्मनश्चैतन्यं रवेरिव तेजस्वित्वं, न च हेतुभेदानविधायितया जानाभ्यज्ञासिषमित्यादिकालावच्छेदप्रतीतेर्गमनादेरिव ज्ञानस्यागन्तुकत्वमनुमेयम् आदित्यप्रकाशेनानैकान्त्यात् अस्ति हि तत्रापीमं देशमादित्यः प्रकाशयति प्राचीकशत्प्रकाशयिष्यतीति प्रतीतिः स्वारसिकत्वेऽप्यादित्यप्रकाशस्य प्रकाश्यदेशसंबन्धकादाचित्कतया अवच्छेदप्रतीतिरुपपद्यत इति चेत् इहापि तर्हीन्द्रियादिप्रत्यासत्तिसमासादितयोग्यभावोऽनुभाव्यभेदस्वाभाविकमात्मनश्चैतन्यगुणमवच्छिनत्तीति तदपेक्षयैवेन्द्रियादानुविधानमतीतानागतप्रत्युत्पन्नत्वप्रत्ययप्रयोगौ चोपपद्येते कथं पुनरत्र निर्णयः द्युमणिमणिप्रकाशादेरिवौपाधिकोऽयं भेदः न तु गमनपचनादेरिव स्वाभाविक इति तादृक्त्वेनैव प्रत्यक्षत्वात् न हि जातुचिदचिद्रूपोऽयमात्मा लोष्टादिवददृष्टचरः, यश्च यद्गुणतयैव साक्षाद्भवति स तत्स्वभावः मरुदिव स्पर्शगुणतयैवाध्यक्ष्यमाणः यो यत्स्वभावो न भवति स तद्विरहेणापि स्वरूपत उपलभ्यते गमनादिरहिततयैव देवद-

त्तादिः शरीरवदिति चेन्नासिद्धत्वात्, स्यादेतत् यथैव खल्वस्वभावभूतेनापि शरीरेण सम्बन्धीचीन एवायं चेतनश्चकास्ति तथा चैतन्येनापीति तन्नैवम् असिद्धत्वात्, न हि तनुविशिष्टतयैवायं चेतनः परिस्फुरति योगिनां प्रणिहितमनसामुपरतबहिरिन्द्रियाणां च देहानुसंधानविरहेणाप्यहमिति स्फुटमनुभवात् जानामीति प्रत्ययः शरीरवर्णसन्निवेशनिर्भासशून्यतया तत्त्वान्तरगोचर इति च प्रागेवावोचं कर्मानुगुण्येन सुरमनुजादिजातीयतया भिद्यमानास्वागमापायिनीषु तनुषु मनस इवैकस्य वर्ष्मणः स्वभावानुबन्धित्वेनाश्रयितुमशक्यत्वात् लिङ्गस्य पुनरनुवृत्तावप्यप्रत्यक्षत्वान्न व्यभिचारित्वम्। बोधस्वाभाव्ये पुंसः स्वापमूर्च्छयोः प्रकाशप्रसङ्ग इति चेन्न विकल्पासहत्वात् तथा हि प्रकाशइति यदर्थमात्रसाधारणं बोधजन्यम् प्रकटतादि पदपर्यायधर्ममभिप्रेत्य वायं प्रसङ्गः। अथ बोधमेव तद्विप्रकर्षं वा आदेयं तदभावादेव न प्रसङ्गः अभावश्च प्रकटित एव संवित्खलतः सिद्धिसमर्थनसमये भावेऽपि तमःप्रतिबन्धादप्यनुदयः संभवी इतरयोरभिमतमेवापादितमित्यदोषोद्भावनम्। बोधस्वाभाव्ये हि पुरुषस्य स्वापादिदशासु च तथाभावोऽभिमत एवेति, न हि तदापादनं दोषाय, अथ मतं स्वापादावपि स्वानुभवसद्भावे जागर इव व्यवहारप्रसङ्ग इति मैवं व्यवहारागोचरत्वात् कः खल्वात्मनि व्यवहारः न ह्यसावादातुं हातुमुपेक्षितुं वा शक्यः व्यवहारः प्रसज्यत इति चेत् किमङ्ग निर्विकल्पकबालमूकादिवेदनविषयो व्याक्रियत एव करणपाटवव्यवजिहीर्षादिसहकारिविरहात्तत्र व्याहारानुदय इति चेत्

समानोऽयं विधिरितरत्रापीति निरनुयोज्यानुयोगस्यातिप्रसङ्ग इति चेन्नाद्दृत्तित्वात् यद्दाच्येत मूर्च्छादावात्मानुभवाभ्युपगमे अर्थान्तरानुभव इव एवमहमन्वभूवमिति परस्तात्स्मृतिः प्रसज्यत इति तन्न अदृत्तित्वात् न हि मूर्च्छा प्रस्वापो वा बुद्धिवृत्तिविशेषः दर्शनस्पर्शनादिवत् येन स्मृतिबीजं संस्कारमादधीयाताम् । किं तूद्भूतेन तमसा उपरतव्यापारेषु करणेषु निर्वृत्तिकसांसिद्धिकबोधस्वरूपेणावस्थानमात्मनः, न च बोधस्वभावत्वादेवास्य संस्काराधायकत्वम् अनवरतोपचीयमानसंस्कारतयाऽनिर्मोक्षप्रसङ्गात्, अनुभवे च स्वानुरूपसंस्काराधाननिरुद्धे सदृशसंबन्धिदर्शनादिसमुद्बोधितनिजबीजानुसारेण स्मरणमुपजायते न चेहात्मस्वरूपबोधस्य जातुचिन्निरोधो जन्मवानित्यात्मसत्ताप्रयुक्तत्वात् निमित्तान्तराभावश्चानन्तरमेव व्याकरिष्यते तदेवमनुवर्तमान एवानुभवे कथं स्मृतिरुदयमासादयेत् य एवाहं पूर्वेदुरासं स एवाहमद्यापीति स्मृतिसंभिन्नप्रत्ययोऽपि कालावच्छिन्नस्वरूपगोचरः, न स्वरूपमात्रे अविशदश्च स्वापादौ स्वानुभवः निर्विकल्पश्च पटीयसा सविकल्पकेनावगमेन स्मृतिबीजमाधीयत इति कुतस्तत्प्रसङ्गः साम्याच्चाननुभवाभिमानः शरीरतद्धारणप्रयत्नानुसंधानवत् न चाविकृतस्वाभाविकबोधमात्रेणावस्थाने स्वापमोक्षयोरविशेषापत्तिः क्लेशवासनानां गुणाभिभवस्य चैकत्र भावात् इतरत्र तदत्यन्तनिवृत्तेः संप्रज्ञातसमाधावपि परमवैराग्यशालिना पटुतरनिरोधसंस्कारेण चरिताधिकारिणा अपवर्गिणा विशेषः कथं पुनर्निद्राया अदृत्तित्वे प्रबुद्धस्य प्रत्यवमर्शः सुखमहमस्वा-

प्समित्याद्याः, न ह्यननुभूतगोचराः स्मृतयः संभवन्ति,सत्त्वसचिवसमुल्लसिततमोगुणानुभवभावितभावनायोनिः खलु सुखमहमस्वाप्सं प्रसन्नं मे मनः लघूनि मे गात्राणीति प्रत्यवमर्शः। रजस्तमःसमुद्रेके तु दुःखमहमस्वाप्सं भ्रमत्यनवस्थितं मे चित्तमिति सत्त्वरजसी त्वभिभूय नितान्तमुद्भूते तमसि गाढं सृढं सुप्तोऽस्मि गुरूणि मे गात्राणि सुषितमिव मनोमौलितमिवेति सत्यमेवम् दत्तोत्तरं ह्येतत्, नैवामी वासनायोनयः प्रत्ययाः, अपि तु तात्कालिकशरीरेन्द्रियमनोऽवस्थाविशेषपर्यालोचननिमित्ता आनुमानिका इति, एवंरूपा हीमे यतः प्रसन्नं मे मनः सम्यगाहारपरिणामवशाल्लघूनि चाङ्गानि अतः सुखमहमस्वाप्समिति स्वापावस्थायां वेन्द्रियोपरमतारतम्यवशादविशदतात्कालिकतत्तदनुकूलप्रतिकूलविषयानुसंधाननिबन्धनतयाऽपि स्मरणमुपपद्यत इति न वृत्त्यन्तरत्वं निद्रायाः, कथं तर्हि पारमर्षं सूत्रम् अभावप्रत्ययालम्बनावृत्तिर्निद्रा इति निरोधपरत्वात् प्रकरणस्य न वृत्तिस्वरूपे तात्पर्यं विपर्ययवत्, न ह्यतद्रूपप्रतिष्ठं मिथ्याज्ञानं किंचिदस्ति सर्वसंविदामर्थाव्यभिचारात् स चाधिकरणसिद्धः साधयिष्यते चोपरिष्टात् कैवल्यभागियच्चित्तु प्रत्यनीकतया निद्रादेर्निरोध्यत्वेनोपदेशः, अस्तु वा पूर्वोक्तप्रमाणाद्वृत्त्यभावकारणभूतप्रचिततमतमोगुणावलम्बना वृत्तिरेव निद्रा सन्तु च प्रबुद्धप्रत्यवमर्शाश्च स्मरणानि तथा सत्यनवरतानुवृत्तबोधतया स्थितमेव पुंसोबोधस्वभावत्वम् आह बोधकारणानुवृत्त्याऽपि बोधानुवृत्तिरुपपद्यत इति, कथं तथा स्वाभाव्यनिश्चयः इत्थम्।

यतः स्वतःसतोबोधाद्वृते पुंसो यथोदितम्।

तमःस्वापादिकालीनं न सिध्येद्धेत्वसिद्धितः ॥

उपरतानि हि प्रस्वापकाले सर्वाण्येवेन्द्रियाणि सह मनसा, संस्कारस्य च न स्मृतेरन्यत्र सामर्थ्यम्, न च स्वप्रकाशं तमः अर्थान्तरवर्तिनोऽप्यनिशं प्रकाशप्रसङ्गात् कृत्स्नस्य सर्वार्थसाधनतया बोध इति तेनैव करणविरहिणा सता स्वभावभूतेनोद्भूतेनोद्भूतवृत्तेस्तमसोऽन्यस्य वाऽऽत्मवर्तिनो गुणस्य स्फुरणमिति बलादभ्युपगमनीयं, नित्यप्रकाशश्चात्मा प्रमातृत्वात्, अप्रमातृत्वव्यापकवह्नं ह्यनित्यप्रकाशत्वं व्यापकविरुद्धप्रमातृत्वभागिन्यात्मनि नात्मानं लभते, स्वतःसिद्धप्रकाशत्वमप्यस्य ज्ञातृभावः अज्ञातृत्वेन हि व्याप्ता परायत्तप्रकाशता, कः पुनरयं प्रकाशो योऽस्य नित्योऽभ्युपेयेत स्वाभाविकश्च कश्चास्यात्मना संबन्धः, यदि ज्ञानमेव संबन्धस्याश्रयाश्रयित्वं ततो हेत्वभावेन साध्याभावस्य व्याप्तिमुपदर्शयितुं निदर्शनतया घटादुपादातव्यं यदनित्यप्रकाशमन्याधीनप्रकाशं वा तदप्रमातृ यथा घटादीति,तत्र च विशेषनिषेधस्य सामा*न्याभ्यनुज्ञाऽऽक्षेपकत्वादागन्तुकं ज्ञानं घटादावनुमतमापद्येत। अथ तन्माभूदिति विषयविषयिभाव एव संबन्धः संगीयेत ततोनित्यवज्ज्ञानविषयत्वमात्मनः प्रसज्येत ज्ञानविषयीकारश्च साधनविशेषायत्तत्वेन नियत इति न स्वाभाविकत्वसंभवः अचेतनगोचर एव तथा नियम इति चेन्न चेतनान्तरविषयीकारेऽपि तथाभावदर्शनात्, न चानात्मगोचर एव साधनसापेक्षत्वनियम इति वाच्यम् आत्मनोऽप्यानुमानिकागमिकयोगज्ञानविषयीकारे त-

---

* विशेषविधिनिषेधौ सामान्यविधिनिषेधाभ्यनुज्ञाफलकाविति हि न्यायस्वरूपम् ।

त्वापेक्षत्वदर्शनात् विरुद्धे चैकस्यैकक्रियायां कर्मकर्तृत्वे सूच्यग्रस्थेवात्मनि वेध्यवेधकत्वे, नित्यत्वनिरतिशयसूक्ष्मत्वव्यापित्वचित्स्वाभाव्यादिरूपेण प्रत्यगर्थस्यौपदेशिकत्वमानुमानिकत्वं वा न स्वरूपतः स्वरूपापेक्षयैव स्वतःसिद्धिरभ्युपेयत इत्यसमाधेयो विरोधः रूपभेदेन गम्यगमकत्वाङ्गीकारपक्षे पक्षस्येव शब्दादेर्न स्वतःसिद्धत्वम्। अथोच्येत न प्रकाशो ज्ञानमपि तु तन्निमित्तश्चेतनेतरसर्वपदार्थसाधारणो धर्मः यद्वशात्प्रकाशत इति प्रख्योपाख्ये प्रतायेते सर्वपदार्थेष्वविशेषेणाश्रयाश्रयित्वलक्षणश्च संबन्धस्तेन सह सर्वभावानां, स च यथोदितसाधनबलादेव सांसिद्धिको नित्यश्चात्मन इति पराकृतोऽयं पक्षः न ज्ञानातिरेकी प्रकाशो नाम यद्व्यवहारोपजननानुगुणं ज्ञानं तत्प्रकाशत इत्युच्यते ज्ञेयस्य ज्ञातुः स्वात्मनश्च व्यवहारानुगुणं ज्ञानमुदयत इति युक्तास्विष्वप्येकप्रकारः प्रकाशत--व्यवहारः,तत्त्वान्तरप्रकाशाभ्युपगमे तत्स्वाभाव्येन च पुनः किं चैतन्याश्रयणेन, न च प्रकाश एव तदिति वाच्यम् घटादेरपि प्रकाशवत्तया चेतनत्वप्रसङ्गात्, यद्युच्येत सति चेतनावत्त्वे पुंसः प्रकाशमानत्वमिति संविदोदानीं का वार्ता चेतनैव हि सा न चेतयते। अथ संविदस्तत्संबन्धाधीनः स धर्म इति चेत् कस्तया संबन्धः यस्तन्निबन्धनं नाश्रयाश्रयित्वं घटादेस्तदभावप्रसङ्गात्, न विषयविषयिभावस्तस्यैवानिरूपणात्, अनिरूपणं च भ्रान्त्यधिकरणसिद्धान्तारम्भे संवित्सिद्धौ चानुसंधातव्यम् आत्मनस्तस्य चाप्रकाशप्रसङ्गश्च ज्ञानाधीनप्रकाशाश्रयतैव सिद्धिस्तया चानुमेयं ज्ञानमिति पक्षः प्रागेव प्रतिक्षिप्तः, स्वप्रकाशसंविदादिनोऽपि व्यव-

हारानुकूल्ये वैरूप्यमशक्यपरिहारम्, आत्मनि समवेतं ज्ञानमसंबन्धिन्यर्थे प्रकाशं व्यवहारं वा कथं प्रसुवीतेत्यपि चिन्त्यम् । इन्द्रियलिङ्गादिस्वकारणप्रत्यासत्तिवशादिति मा वोचः न खलु लब्धात्मकं कार्यं स्वनिमित्तकारणमनुरुध्य कार्यमारभते मा भूदुदकाहरणादि घटादेः कुलालादिसमानाधिष्ठानम् न च निमित्तकारणनाशे कार्यनाशः, नश्यति चेन्द्रियसंप्रयोगादिनाशे रूपादिज्ञानम् अत इन्द्रियेण सह चैतन्यमपि निःसृत्य तेनतेनार्थेन सन्निकृष्यते हस्तादिनेव त्वगिन्द्रियम्, तथा सति हि तदुपाधिकत्वात्तज्ज्ञानस्य युक्तं तद्भावानुविधायित्वम् अन्यथोत्पन्नं ज्ञानमिन्द्रियार्थसन्निकर्षनिवृत्तौ किमिति निवर्तते ज्ञानजन्यार्थधर्मप्रकाशवादिनोऽपि समानोऽयं दोषः, निमित्तकारणं हि ज्ञानं कुतस्तन्निवृत्तावर्थप्रकाशो निवर्तते कुतो वा यावत्तद्भावमवतिष्ठते । न च संख्यादिनिदर्शनेनात्र प्रत्यवस्थानं युक्तम् ।

असिद्धत्वेन नाशस्य संख्याया बुद्धिनाशतः ।
एकसंख्येव संख्यात्वादन्याप्याद्रव्यभाविनी ॥
सर्वा ह्येकाश्रया संख्या नित्यानित्यार्थवर्तिनी ।
यावदाश्रयसत्येव संमता सर्ववादिनाम् ॥
द्वित्वादिका परार्धान्ता संख्या याऽनेकवर्तिनी ।
साऽपि संख्यात्वसामान्ये सति कस्मान्न तादृशी ॥

ननु नैकत्वं संख्या स्वरूपानतिरेकात् अतः साधनविकलमुदाहरणम्, मैवम् संख्यैव सा द्रव्यान्तरेऽप्यनुवृत्तेः, यदि हि घटादेः स्वरूपमेवैकत्वं ततो घट एकः पट एक इति सर्वद्रव्यसाधारण्यमेकत्वस्य न स्यात्, न हि घटस्वरूपस्य पटस्वरूपेण संभवति सामानाधिकरण्यं घटः

पट इति अस्ति तु तदेकत्वस्य । किंच

संख्यैकताविरुद्धत्वाद्द्वित्वसंख्यैवान्यसंख्यया ।
एकं द्वाविति न ह्यस्ति सामानाधिकरण्यधीः ॥

यत्तु अनेकद्रव्यवृत्तित्वे सति गुणत्वात् संयोगवदयावद्द्रव्यभाविनी द्वित्वादिसंख्या इति तन्नानात्वेऽनैकान्तिकम्, न हि मतेरेव घटपटयोस्तन्नानात्वं नश्यति न च तद्द्वित्वसंख्यैव त्रयाणां तदभावप्रसङ्गात् न च तदेकत्वाभावमात्रम् तुच्छस्यापि नानात्वापत्तेः ।

आपेक्षिकत्वाद् द्वित्वादेः प्रतियोग्यनवग्रहात् ।
बुभुत्सोपरमाच्चापि सत्या एवानवग्रहः ॥

अतश्चैतन्यस्यैवेन्द्रियद्वारा अर्थसन्निकर्षे एव तद्भावाभावानुविधानोपपत्तेः अन्यच्च अर्थस्य प्रकाशकं हि ज्ञानं भवताम् सर्वं च प्रकाशकं प्रकाश्यवस्तुसन्निकृष्टमेव प्रकाशकं दृष्टं दीपप्रभादि अतस्तदपि तथेति युक्तमाश्रयितुं व्योमवदमूर्तस्य न क्रियावत्त्वमिति चेत् केयममूर्तिर्नाम यद्विरहिणः क्रियाऽयोगः, यदि पारिभाषिकी द्रव्यत्वे सति क्वाचित्कतेति इष्यत एव सा चैतन्ये, न हि तत्सर्वगतं द्रव्यं तथा सति युगपत्सर्वार्थसिद्धिप्रङ्गात् क्वाचित्कत्वे तु तद्धि यदैकदैकेन्द्रियेण संप्रयुक्तं तदर्थाभिमुखं न तदेन्द्रियान्तरमधितिष्ठति, अत एव हि युगपज्ज्ञानानुत्पत्तिः निरतिशयवेगं च तत् युगपदिवातिशीघ्रमनेकेन्द्रियाधिष्ठानदर्शनात् अतो यथोदितममूर्तत्वं सिद्धम् स्पर्शवत्ता मूर्तिस्तद्विरहान्निष्क्रियत्वमिति चेत् शब्देनानेकान्तः, स खलु शङ्खमुखादेर्दवीयसोऽपि देशान्नोदनविशेषेण लोष्टादेरिव यावद्वेगं प्रतिष्ठते स्पर्शविहीनोऽपि स्पर्शरहितस्यापि मनइन्द्रियस्य क्रियावत्त्वं पदार्थवा-

क्यार्थविदामुभयेषामपि संमतमेव कथमतीतानागतयोरसतोश्चैतन्येन संप्रयोग इति चेत् कथं वा विषयभावः प्रकाशमानत्वं संख्यादियोगो वा तयोर्यस्मात् निर्वाहः स एवास्तु अपि चातीततयाऽनागततया च तावप्यद्यापि विद्येते इति तेन रूपेण बोधसन्निकर्षकाऽनुपपत्तिः । किंच यथा दवीयसि देशे सता ध्रुवशिंशुमारादिना दृक् सन्निकृष्यते तथा दवीयसि काले सता कल्पाद्यन्तवर्तिना स्वयंभुवादिनेति नास्त्येकं किंचित् । किंच ।

नातीतानागते बुद्धेर्दूरे भवितुमर्हतः ।
बुद्ध्या प्रकाशमानत्वाद्बुद्धिवोद्यस्वरूपवत् ॥

एवं च चैतन्यस्य निरतिशयवेगितया अन्तरालदेशकालाग्रहणाभिमानोऽलातचक्रगतक्रमवद् देशभेदसंयोगविभागाग्रहणाभिमानवत् । अपि चेन्द्रियलिङ्गसंस्कारादेर्यदर्थप्रतिनियतं रूपं तेनैवोपश्लिष्य निःसरच्चैतन्यमपि तद्गोचरेणैव सन्निकृष्यते यथा गवादिपदशक्तिरेकबुद्धिसिद्धेऽपि सामान्यविशेषात्मके वस्तुनि सामान्यांशेनैव संबध्यते, यथो वा विधिः प्राप्तांशपरिहारेणाप्राप्तांशमेव भावनायाः स्पृशति, अत इन्द्रियादिद्वारेण चैतन्यमपि तदर्थाभिमुखं निर्गच्छतीति न्याय्यं, यथाऽऽह भगवान् तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि इति, मनुश्च ।

इन्द्रियाणां हि सर्वेषां यदेकं चरतेन्द्रियम् ।
तेनास्य चरति प्रज्ञा हृतेः पादादिवोदकम् ॥

इति, यत्तु गुणश्चैतन्य गुणिनमपहाय कथमन्यतो यातीति तदयुक्तम् । प्रहाणानभ्युपगमात् अप्रहायैवात्मानमितस्ततश्चेतना इन्द्रियादिद्वारान्निश्चरति विच्छिन्नायाश्च तस्याः संधानासंभवः शास्त्र एवोक्तः दृश्य-

न्ते च गुणा अपि शब्दगन्धसूर्यालोकरत्नप्रभादयो गतिमन्तो घर्षतिवर्तिनश्च अतिसूक्ष्मो दूरगमनधर्मा भौतिको हि शब्दः। ननु नभ इव विभुः शब्दः व्यञ्जकध्वनिवशेन प्रादेशिक इव गत्वर इव चोपलभ्यते तथा हि शब्दः सर्वव्यापी एकद्रव्यवर्तित्वे सत्याकाशगुणत्वात् तत्परिमाणवत्, नैवम् अतद्गुणत्वात् वायवीयः शब्दः तेन नियतसहोत्पत्तिकत्वात् तदीयस्पर्शवत् यश्च येन द्रव्येण नियतसहोत्पत्तिगुणः स तद्गुण एव यथा तथाविधा रूपादयः नियतसहोत्पत्तिश्च वायुना शब्दः उभयोरपि भेरीदण्डवंशदलनादिसंयोगविभागजत्वनियमात्, उत्पद्यते च शब्दः इन्द्रियग्राह्यत्वे सति गुणत्वाद् गन्धादिवत्, कृतकश्च क्रियोत्तरमेवोपलभ्यत्वात् संयोगादिवत् न चाभिव्यञ्जकत्वं प्रयत्नादेः कल्प्यं गौरवात् तत्प्रतीतिकारणत्वकल्पनादपि तत्कारणत्वकल्पनैव हि लघ्वी अभिव्यञ्जकाश्च एकदेशावस्थितानेकेन्द्रियग्राह्यान् युगपदभिव्यञ्जन्ति यथा प्रदीपो रूपसंख्यापरिमाणानि करकादींश्चैकप्रदेशवर्तिनः, न चैवं तालादिसंयोगविभागजनितपवन इति नासौ व्यञ्जकः।

नित्यत्ववादिनः शब्दा निर्भागव्योमवर्तिनः।
श्रावणाश्चेत्यभिव्यक्तिनियमे नास्ति कारणम्॥
देशैक्ये ग्राहकैक्ये च व्यञ्जकैक्यं हि दर्शितम्।
तदभावात्प्रयत्नोत्थमाकृतः कारणं ध्वनेः॥
अत एव च नानात्वं प्रत्युच्चारणमिष्यताम्।
कृतस्य करणायोगाद्धेतुपौष्कल्यभेदतः॥
किंचोदात्तानुदात्तत्वदीर्घत्वह्रस्वतादयः।
गादिस्था युगपद्गान्तो न भिन्द्युः स्वाश्रयान् कथम्॥

स्यानैक्यायातसादृश्यात्प्रत्यभिज्ञाऽपि नैक्यतः ।
प्रदीपप्रत्यभिज्ञेव ज्ञापिता भेदहेतवः ॥

नन्वेवं चैतन्यसंयोगः संयोगजो वा कश्चित्प्रकाशः प्राप्तः उभयमपि तन्न चैतन्ये संभवति भेदापेक्षत्वात्संबन्धस्य, आत्मनोऽपि न चैतन्येन संयोगस्तद्धर्मित्वात्, न हि धर्मधर्मिणोः संबन्धः संयोगः समवायो हि सः अयुतसिद्धसंबन्धत्वात् संयोगस्तु पृथग्विसद्धयोर्द्रव्ययोः क्रियानिमित्ता प्राप्तिः अकार्यकारणयोर्वा तयोर्निरन्तरस्थितिः चैतन्यसंयोगसमवाययोरन्यतरस्य संबन्धमात्रस्य वा प्रकाशत्वे ज्ञातृज्ञानज्ञेयशरीरेन्द्रियेष्वव्याप्त्यतिव्याप्ती, यथायोगमादर्शयितव्ये तत्त्वान्तरप्रकाशाभ्युपगमस्त्वनुपलब्धिबाधितो न दूषणान्तरं प्रयोजयति अतो यद्व्यवहारोदयानुगुणं ज्ञानं तत्प्रकाशत इत्येवाभ्युपगमो युक्तः चितयव्यवहारानुगुण्यं संविदस्तु स्वभाव इत्यपर्यनुयोज्यं निमित्तवैरूप्यम्, न हि स्वभावाः पर्यनुयोगमर्हन्ति एवं चेत्संयोगसमवायविरहिणोऽपि प्रदार्थस्य निमित्तभेदानुसारेण व्यवहारहेतुः संविदिति युक्तमाश्रयितुम्, उच्यते उक्तमत्र न निमित्तकारणमनुरुध्य कार्यं स्वकार्यमारभत इति व्यवहारानुगुणसंवेदनत्वेऽपि प्रकाशपदार्थे प्रवृत्तिनिवृत्तिभेदो दुष्परिहर एव बहुव्रीहिसमासाश्रयणे संविदन्तराभावेन तस्यां तदभावप्रसङ्गात्, कर्मधारयाश्रयणे ज्ञातृज्ञेययोरसंवेदनत्वेनाप्रकाशप्रसङ्गः । व्यवहारोदयानुगुण्यं च व्यवहारतोऽवगन्तव्यम् ततः प्रागेव च भवति विदितत्वप्रतीतिर्व्यवहारश्च यदेवं कस्तर्हि प्रकाशते—पदार्थः न हि निरवद्यमेकरूपं ज्ञातृज्ञेयज्ञानानुगतं तदुपलभा-

महे, उच्यते नूनं भवानश्रुतपूर्वी प्रथमाधिकरणस्य न्याय-तत्त्वे अभिहितं हि तत्रेदम् अनुभवे स्मृतिमुपपादयद्भि-रनुभवादूरत्वं स्मृतिनिमित्तमिति, एतदुक्तं भवति सं-विदूरत्वं प्रकाश इति आह किमिदमदूर इति दूरा-दन्यत्तद्विरुद्धत्तदभावो वा तथा विशेषणमुपलक्षणं वा अदूर इति विशेषणत्वे पक्षत्रयेऽपि नियमेन संवेदनदूर-त्वानुसंधानपूर्विकया प्रकाश इति प्रतीत्या भवितव्यम् न च तथाऽस्ति उपलक्षणत्वे स्वरूपान्तरं वाच्यम्, न च तदवगम्यत इत्युक्तम् उच्यते अलमस्थाने संभ्रमेण।

भवत्वनुभवादूरं दूरादन्यद्विरोधि वा।
तद्भावश्च प्रकाशत्वं किमत्र बहु जल्प्यते॥

प्रकाशत इति प्रतिभासोऽपि बुद्धिविप्रकर्षप्रत्यनी-कबोधतत्संसृष्टपदार्थस्वरूपविमर्श एव बाह्यप्रकाशवत् तत्रापि ह्यालोके तद्व्याप्तभूभागादौ च प्रकटादिप्रख्यो-पाख्ये आलोकादूरत्वनिमित्ते यथा च तत्र तन्निमित्ता सन्तमसनिवृत्तिरेवमिहापि ज्ञानादूरत्वनिमित्ताज्ज्ञान-निवृत्तिः, अत एव चानुभूते अनुभवे चोत्तरकालतुल्य-वत्स्मरणम् एवं च चैतन्यसंबन्धविशेषविषयविकल्पोऽप्य-लब्धावकाश इति निरनुयोज्यानुयोग एव, नैरन्तर्यपद-पर्यायमत्यन्तसामीप्यमाहुं च संयोगः, स एव परतन्त्रा-श्रितः समवायपदपरिभाषाभूमिर्वैशेषिकाणामिति नार्थान्तरत्वमूरीकृत्य विकल्पः संभवति, यथा च संयोगा-न्तर्भावः समवायस्य तथा संबन्धविमर्शे दर्शयिष्यामः, ज्ञा-नादूरत्वप्रयुक्तो व्यवहारक्षमतालक्षणो वा परः प्रकाशः स च सत्यपि स्वनिमित्तपौष्कल्ये प्रतिबन्धाद् योग्यता-विरहाद्वा व्यापित्वासंगित्वाद्यात्मधर्मान्तरेषु देहेन्द्रि-

यादौ च न संजायते चक्षुःसन्निकृष्ट इव कालिन्दीपर्यसि रूपरसादयः, अतो यथोक्तनीत्या आत्मा स्वतश्चैतन्यविग्रहो ज्ञानस्वभाव एवान्यत्करणैः प्रतिपद्यते । यत्तु सुखादिनिदर्शनेनात्मविशेषगुणतया चितेरागन्तुकत्वमापादितं तदपि गुणद्रव्यापरिज्ञानेन यतः ।

स्वरूपोपाधयो धर्मा यावदाश्रयभाविनः ।
नैवं सुखादिबोधस्तु स्वरूपोपाधिरात्मनः ॥

यथा च बोधोपाधिरात्मभावस्तथोपपादितम्, सुखदुःखे चानात्मधर्मौ इन्द्रियसौष्ठवनाशयोरेव तद्भावोपपादनात्, व्याकरिष्यते चैतदन्तिमपदार्थसमर्थनावसर इति साधनविकलता च निदर्शनस्य, रागद्वेषादयोऽपि मनोऽवस्थाविशेषाः न साक्षादात्मगुणाः, विज्ञायते हि कामः संकल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव इति, गीयते च इच्छा द्वेषः सुखं दुःखम् इति चेतना धृतिः इति चैवलक्षणमेकपद्येन चेतनया म्रियमाणः संघातो हि देहः स्वहेत्यनुगुणचैतन्यमात्रादेव प्रवर्तमानं क्षेत्रमिति यावत्, अत एव हि अन्तर्यामिब्राह्मणे यस्य पृथिवी शरीरम् यस्यापः शरीरं यस्यात्मा शरीरम् इत्यादि निर्देशः तानि सर्वाणि तद्वपुः इति च पुराणे किमिदं घोरिति उत्प्रेक्षाभिप्रायम् तन्न ज्ञप्तिविषयं तस्याः स्वाभाविकत्वस्य तस्यामेव श्रुतौ श्रूयमाणत्वात्, श्रूयते हि न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते इति, न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वात् इति च ज्ञातुरविनाशित्वादेव ज्ञानस्याविनाशमुपपादयन्तीयं श्रुतिर्ज्ञातुः स्वरूपप्रयुक्तं ज्ञानमिति दर्शयति, न च दृष्टिविशेषणतया द्रष्टुरुपाद-

नमिति सांप्रतम् पुँल्लिङ्गनिर्देशविरोधात् हेतोश्च साध्यसमत्वापत्तेः, द्रष्टुः स्वरूपनिर्देशपरत्वेऽपि दृष्टिपदस्यासमाधेयमहेतुत्वं स्वपक्षहानिश्च, आत्मनस्तु नित्यत्वमप्रचाल्यानेकन्यायागमसिद्धं युक्तं हेतुतया व्यपदेष्टुम्, न हि सति पदार्थे तत्स्वरूपोपाधयो न भवितुमर्हन्ति सति कनक इव पैङ्गल्यम् प्रभेव च प्रदीपे, तेनायमर्थः आत्मस्वभावभूतायाश्चितेर्बाह्याभ्यन्तरविषयविशेषसंबन्धप्रकारप्राप्तदृष्टिघातिरसयतिवक्तिस्मृतिमतिस्रष्टिविज्ञातिव्यपदेशभेदायाः स्वात्मावभासिन्याः संसारापवर्गावस्थयोर्न जातुचिद्विपरिलोपोविद्यत इति, स यथा सैन्धवघनोऽनन्तरोऽवाह्यः कृत्स्नो रसघन एवं वा अरे अयमात्मा अनन्तरोऽवाह्यः कृत्स्नः प्रज्ञानघनः,तथा स्वेन भासा स्वेन ज्योतिषा आत्मज्योतिःसम्राडिति होवाच तथाऽपवर्गदशायामेव छन्दोगाः। न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् सर्वं ह पश्यः पश्यति नोपजनं स्मरन् इति च स वा एष एतेन दैवेन चक्षुषा,मनसैताम् कामान् पश्यन् रमते। अन्याश्च जानात्येवायं पुरुषो ज्ञातव्यं तु न वेद इत्याद्याः सकलकरणोपरमदशायामप्यात्मनः प्रबोधमभिदधानाः श्रुतयो बोधस्वभावतामस्य दृढयन्ति निर्वाणमय एवाहमात्मा ज्ञानमयोऽमलः इत्यादि च पुराणे, ज्योतिषामपि तज्ज्योतिः इत्यादौ तिहासे, भगवान् शौनकश्च।

यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्नभः।
दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा॥
यथोदपानकरणात् क्रियते न जलाम्बरम्।
सदेव नीयते व्यक्तिमसतः संभवः कुतः॥

तथा हेयगुणाध्वंसादवबोधादयो गुणाः ।
प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते ॥

इति, अत एव हि सूत्रकारश्च क्षीऽत एव इति, तदेवमात्मस्वभावभूतस्य चैतन्यस्य विषयसंश्लेषविशेषेषु निश्चयसंशयादिव्यवहारभेदस्तद्विशेषभाजि चैतन्ये वा चैतन्यस्य विषयेण दृढसंयोगो हि निश्चयः तस्यैव बहुभिर्युगपद् दृढसंयोगः संशयः ज्ञानवासनानुसारेण संश्लेषः स्मरणमित्यादिः, उक्तं च आत्मधर्मस्य चैतन्यस्य विषयेण संयोगो ज्ञानमित्युच्यते इति, न चैवं संयोगस्योभयाश्रितत्वेन विषयस्यापि ज्ञातृत्वप्रसङ्गः विषयेण संयोगाभावात्, चैतन्येन हि तस्य संयोगः वाह्यप्रकाशवत् यथा खल्वालोकसंबन्धेऽपि प्रकाशे सूर्यादेरेव प्रकाशकत्वं न घटादेः । अथ सूर्यादितत्त्वत्वादालोकस्य स एव तद्धर्मी तत्संबन्धेनार्थान्तरस्य प्रकाशः इत्युच्यते इहापि तर्हि चैतन्यस्यात्मधर्मत्वात्तेनार्थान्तरं स्पृशन् स एव जानातीत्युपपद्यते तत्सिद्धं चैतन्यस्वभाव एवायमात्मा आत्मानं विदन्नेवास्ते अन्यत्तु निमित्तभेदानुसारेण जानाति न जानाति चेति, तदेवं चैतन्यस्वभावः परिस्फुरन्नप्ययमात्मा गम्भीरजलाशयचरमीनवज्जलसंसृष्टक्षीरवच्च न विविच्य स्फुटं चकास्तीति तदुपपादनन्यायानुगताः पूर्वानुमानभेदा वचनानि चादृियन्ते तैरप्यपरितुष्यन्तो यमनियमादियोगाङ्गानुष्ठानक्षपिताशुद्धावरणमला निरोधाभ्यासपुटपाकनिर्धूतरजस्तमःकलङ्कसत्त्वोद्रेकसमुत्थस्वेतरसकलविषयवैलक्षण्यापरोक्षज्ञानाय प्रयतन्ते भावनाप्रकर्षपर्यन्ते चापरोक्षज्ञानमुदयत इति सर्ववादिनिर्विवादमिति न तदुपपादनायाद्यप्रयत्यते।

एवमात्मा स्वतःसिद्धस्तागमेनानुमानतः।
योगाभ्यासभुवा स्पष्टं प्रत्यक्षेण प्रकाश्यते॥

अथास्य कालावच्छेदपरीक्षा तच्च सुगतमतानुसारिणः सन्मात्रानुबन्धिनीं क्षणिकतामाचक्षाणा नित्यात्मदर्शनमेव सर्वानर्थमूलं मन्यमानाः क्षणभङ्गिनमेनं संगिरन्ते, यत्सत्तत्क्षणिकं सँश्चायमात्मेति कथं पुनः सन्मात्रानुबन्धिनी क्षणिकता अक्षणिकस्य सत्तानुपपत्तेः, यन्न कस्मैचित्कार्यायालंततः सार्वज्ञ्यविज्ञानगोचरत्वायापि न प्रभवति न तस्य सद्भावः संभाव्यत इत्यर्थक्रियाकारितैव सत्ता भावानाम्। न च सा स्वव्यापकभूतक्रमयौगपद्यविरहिण्यक्षणिके संभविनीत्यन्यत्र निरवकाशतया क्षणिकतयैवानुबध्यते, कथं पुनः क्रमयौगपद्ययोरर्थक्रियाव्यापकत्वं कथं वा तयोरक्षणिकान्निवृत्तिः श्रूयताम्

अर्थक्रियासु भावानां कर्तृत्वस्य द्वयी गतिः।
क्रमेण युगपद्वेति न विधान्तरसंभवः॥

भावाभावव्यतिरिक्तयोरन्यतरनिवृत्तावन्यतरव्यवस्थानादर्थक्रियाजनने भावानां न तृतीयप्रकारसंभव इति क्रमाक्रमप्रतिक्षेपेणैवार्थक्रिया न चाक्षणिके क्रमयौगपद्ये संभवतः॥

इति श्रीभगवद्व्यासमुनिविरचितसिद्धित्रये आत्मसिद्धिः।

ईश्वरसिद्धिरारभ्यते।

तत्र कस्यचिदेकस्य वशे विश्वं प्रवर्तते।
इति साधयितुं पूर्वं पूर्वपक्षं प्रचक्ष्महे॥

तत्र मीमांसकाः प्राहुर्नायं सर्वार्थदर्शनशक्तिसंपन्नः पुरुषोऽभ्युपगममर्हति अतिपतितसकलसाधकप्रमाण-संभावनाभूमित्वात् स्फुटविविधबाधकत्वाच्च तथा हि अस्य प्रत्यक्षमन्यद्वा साधकं भवेत् प्रत्यक्षमपि लौकिकं यौगिकं वा ।

व्यवस्थितमितस्वार्थं न तावदिह लौकिकम् ।
साधनं तेन सर्वार्थतज्ज्ञानादेरसिद्धितः ॥

सर्वार्थदर्शनशक्तिशालिनमवगमयन्तो हि देशकाल-स्वभावविप्रकर्षव्यवधानजुषः सर्व एवार्थास्तद्दर्शनं शक्तिश्च गोचरयितव्यानि, न च विद्यमानेन्द्रियसन्निकर्षयोग्यकतिपयविषयनियतदृक्तेर्लौकिकप्रत्यक्षस्य निरवधिरयं महिमा संभावनाभूमिरिति कथमिव तदिह साधनमिति मन्येमहि, नापि योगिप्रत्यक्षमस्य साधकं यतः

प्रत्यक्षत्वे तदप्येवं विद्यमानैकगोचरम् ।
भूतादिगोचरं वा न प्रत्यक्षं प्रतिभादिवत् ॥

तत्खलु योगिविज्ञानमैन्द्रियकं न वा ऐन्द्रियकमपि वहिरिन्द्रियसंभवमान्तरकरणजनितं वा वहिरिन्द्रियाणि तावत्समधिगतनिजविषयसन्निकर्षसहकारीणि तद्गोचरज्ञानजननानीति जगति विदितम् । अतो न रमनादिभिः रजतातिदृक्तव्यवहितादिसकलविषयवेदन-प्रसङ्गः, न चाविद्यमानै रजतादिभिः संभवति सन्निकर्षः तस्य द्व्याश्रयत्वात् आश्रयाभावे तदसंभवात्, अतोऽपेक्षितोऽर्थसन्निकर्षः सहकारिविरहे कथमिन्द्रियाण्यतीतादिविषयसाक्षात्काराय कल्पेरन्, भवति च यद्यत्सहकारि यत्कार्यजननं तत्तदभावे न तज्जनयति यथा क्षितिसलिलसहकार्यङ्कुरकार्यजननबीजं क्षित्याद्यभावेऽङ्कुरम् अर्थ-

सन्निकर्षसहकारीणि बहिरिन्द्रियाणि ज्ञानजननानीति ताग्यपि नातीतेऽनागते वार्थे ज्ञानं जनयन्तीति न तदुपजनितं प्रत्यक्षं यथोक्तविषयनियममतिक्रामति, नाप्यान्तरकरणसंभवम् आन्तरगोचर एव सुखादौ स्वान्तस्त्वातन्त्र्यात्, बाह्यविषयमितिषु च मनसो निरङ्कुशकरणतास्वीकारे हि कृतं चक्षुरादिभिः, अतश्च न कश्चिदन्धो बधिरो वा भवेत्, भवति चात्र विप्रतिपदं मनोबहिरिन्द्रियानिरपेक्षं न बाह्यप्रत्यक्षगोचरे प्रवर्तते तत्र तत्तन्त्रवृत्तित्वात् यद्यत्र यत्तन्त्रवृत्ति न तत्तन्निरपेक्षं तत्र प्रवर्तते यथालोकापेक्षप्रवृत्ति चक्षुः स्वगोचरेऽन्धतमस इति, न च सिद्धौषधमन्त्रतपःसमाधिमहिमसमासादितातिशयानीन्द्रियाणि कदाचिदपजहति समधिगतविषयनियममिति संभवति, सांसिद्धिकसामर्थ्यविभावैकफलत्वात्तेषां सामर्थ्यस्य च प्रतिनियमात्, न खलु सुप्रयुक्तभेषजशतविहितसंस्कारमपि श्रोत्रं रूपरसविभागावगमाय कल्पते, भवति च विवादाध्यासितबाह्याभ्यन्तरकरणपाटवातिशयोऽनुल्लङ्घितसीमा ऐन्द्रियकप्रकर्षत्वात् दृश्यमानतत्प्रकर्षवत् इत्यैन्द्रियकं ज्ञानं नातीतादि गोचरयति। भावनाप्रकर्षपर्यन्तजन्मनस्तु सत्यपि विशदनिर्भासित्वे प्राक्त्यानुभवगोचरादनधिकमधिकं वाऽध्यवस्यतः स्मृतिविभ्रमस्रोतसोरन्यतरावर्तपरिवर्तिनः कुतः प्रामाण्यकूलप्रतिलम्भः कुतस्तरां च प्रत्यक्षतयोत्तम्भनं प्रत्यक्षस्य वा सतः कथमिव विदितविषयनियमव्यतिक्रमोऽतिक्रमतो वा कुतः प्रत्यक्षत्वमिति न विश्वानुभवैश्वर्यशालिनि प्रत्यक्षं प्रमाणम्। नापि प्रमाणान्तरं तत्खल्वनुमानमागमो वा अनुमानमपि विशेषतोदृष्टं सामान्य-

तोदृष्टं वा तच्च सकलप्रदेशेष्वेवास्ति भगवति न तावच्चलक्षणसाक्षात्कारपूर्वकाविनाभावावधारणाधीनोद्भवत्वादिदमनुमानमुदेतुमक्षमम् । न ह्यनवगतचरहुतभुजस्तदविनाभावितया धूममनुसंधातुमीशते, न च सर्वार्थनिर्माणसाक्षात्कारपटीयसि लिङ्गं सामान्यतोदृष्टमपि किंचन लभ्यते ।

नन्वेकचेतनाधीनं विवादाध्यासितं जगत् ।
अचेतनेनारब्धत्वादरोगस्य शरीरवत् ।
तथा सर्वार्थनिर्माणसाक्षात्करणकौशलम् ।
कार्यत्वादेव जगतस्तत्कर्तुरनुमीयताम् ॥

सर्वं हि कार्यमुपादानोपकरणसंप्रदानप्रयोजनसंवेदिचेतनरचितमवगतं घटमणिकगृहादिकार्यं च विमतिपदमवनिगिरिमहार्णवादीति तदपि तथाविधबुद्धिमद्धेतुकमध्यवसीयते, न च कार्यत्वमसिद्धमिति वाच्यम् अवयवसन्निवेशादिभिर्हेतुभिस्तत्सिद्धेः, इह चान्त्यावयविन्यः प्रभृति द्व्याणुकमखिलमवयविक्रमनिरूप्यमाणनानावयवव्यतिषङ्गविशेषजनितमवगतमित्यन्तत उपादानं चतुर्विधाः परमाणवः प्रपञ्चस्य तेषामादिपरिस्पन्दश्च तदनुगुणादृष्टविशिष्टतत्तच्चेतनसंयोगासमवायिकारणक इति उपकरणमपि समस्तचेतनवर्तीनि धर्माधर्मलक्षणान्यदृष्टानि प्रयोजनं पुनस्तदभिनिर्वर्तितविचित्रार्थक्रियाकारश्चेतनोपकारप्रकारभेदोऽपर्यन्तस्तदुपभुजस्त एव चेतनाः संप्रदानम् । न चामी स्वसमवायिनावपि धर्माधर्मावलमवलोकयितुमिति तदतिरेकी निखिलभुवननिर्माणनिपुणोऽधिकरणसिद्धान्तसमधिगतनिरतिशयसहजसकलविषयसंविदैश्वर्यशक्त्यतिशयः पुरुषधौरेयकः

किमिति न सामान्यतोदृष्टलिङ्गादनुमीयते तदिदमविदितानुमानवृत्तस्य स्वमतिरचिततरलतर्कोल्लसितमिति परिहसन्ति मीमांसकाः। तथा हि किमिदमेकचेतनाधीनत्वं नामाभिप्रेतं तनुभुवनादेः, तदायत्तत्वमिति चेत्।

किमस्य तस्मिन्नायत्तं किन्नु जन्माथ वा स्थितिः।
प्रवृत्तिर्वा द्वयोस्तावत्साध्यहीनं निदर्शनम्॥

न खलु शरीरमेकचेतनाधीनोत्पत्तिस्थिति, ये हि यद्देहाधीनसुखदुःखोपभोगभागिनः, भवति हि तदुचितादृष्टशालिनां सर्वेषामेव तेषां तद्देहिन इव तदुत्पत्तिस्थितिनिमित्तत्वम्। अपि च शरीरावयविनः स्वावयवसमवायलक्षणा स्थितिरवयवव्यतिषङ्गविशेषादृते न चेतयितारं परमपेक्षन्ते, या पुनस्तदपेक्षिणी प्राणनलक्षणा स्थितिः न सा पक्षीक्रते क्षित्यादौ संभवतीति स्थितिमपि नैकरूपां पक्षसपक्षानुयायिनीमुदीक्षामहे, एकचेतनाधीनप्रवृत्तित्वे तु प्रबलबहुजनसरभसप्रयत्नप्रचाल्यैरुपलतरुरथादिभिर्व्यभिचारः आरब्धत्वादेव चैतत्साध्यसिद्धावधिकमिदमुपादानविशेषवचनम्।

चेतनाधीनतामात्रसाधने सिद्धसाध्यता।
चेतनैर्भोक्तृभिर्भोग्यः कर्मभिर्जन्यते हि नः॥

युक्तं चैतद्यदुभयवादिसिद्धानामेव चेतनानां कर्तृत्वाभ्युपगमो लाघवात्, न चोपादानाद्यनभिज्ञतया तत्प्रतिक्षेपः

उपादानं पृथिव्यादियागदानादिसाधनम्।
साक्षात्कर्तुं क्षमन्ते यत्सर्व एव च चेतनाः॥

अद्यतनदेव विश्वम्भरादयः क्रमप्राप्तागन्तुकोपचयापचयैकदेशशालिनो न युगपदेव निरवशेषविलयजननभा-

गिन इत्यन्तिमपरमाणुसाक्षात्कारो न कर्तृभावोपयोगी ।

कर्मणः शक्तिरूपं यदपूर्वादिपदास्पदम् ।
सामूत्यत्यक्षता तस्य शक्तिमध्यक्षगोचरः ॥

न खलु कुलालादयः कुम्भादिकार्यमारभमाणास्तदुपादानोपकरणभूतमृद्दण्डचक्रादिकार्योत्पादनशक्तिं साक्षात्कृत्य तत्तदारभन्ते यदि परं शक्तिमविदुषामभिलषितसाधने तदुपादानादिव्यवहारोऽनुपपन्नः, इह तु

अगमादवगम्यन्ते विचित्राः कर्मशक्तयः ।
तेन कर्मभिरात्मानः सर्वं निर्ममतां पृथक् ॥

अपि च तदेव चेतनकर्तृकं जगति परिदृश्यते यदेव शक्यक्रियं शक्यज्ञानोपादानादि च, न तथा महीमहीधरमहार्णवादीति कथमिव तत्तत्कार्यत्वं, कथन्तरां च तदुपादानोपकरणादेः साक्षात्कारगोचरता, यादृशं हि कार्यमुपादानाद्यभिज्ञपूर्वकमवगतं घटमणिकादि तादृशमेव हि तथाविधबुद्धिमद्धेतुकत्वानुमानाय प्रभवतीति । अपि चानीश्वरेण परिमितशक्तिज्ञानेन विग्रहवताऽनवाप्तकामेन कृतमवगतं घटादि कार्यमिति तथाविधं बोद्धारमुपस्थापयन् हेतुरभिमतपुरुषसार्वज्ञ्यसर्वैश्वर्यादिविपर्ययसाधनाद्विरुद्धः स्यात्, न चैवं सति सर्वानुमानव्यवहारोच्छेदप्रसङ्गः शङ्कितव्यः, प्रमाणान्तरगोचरे हि लिङ्गिनि लिङ्गबलादापततो विपरीतविशेषाँस्तत्प्रमाणमेव प्रतिरुणद्धि इह पुनरतिपतितसकलमानान्तरकर्मभावे सर्वनिर्माणनिपुणे सिषाधयिषिते यावन्तोऽन्वयव्यतिरेकावधारिताविनाभावभाजो धर्मास्तानप्यविशेषेणोपस्थापयति अपि च ।

* पृथक् कुर्वन्तु सर्वत इति पाठान्तरम् ।

स्वार्थकारुण्यभावेन व्याप्ताः प्रेक्षावतः क्रियाः।
ईश्वरस्योभयाभावाज्जगत्सर्गो न युज्यते ॥

अवाप्तकामत्वान्न तावदात्मार्थं सृजति प्रलयसमये प्रलीनसकलकरणकलेवरादिभोगोपकरणतया च चेतनानां दुःखाभावात् दुःखिदर्शनजनितकृपाप्रयुक्तिरपि नास्तीति व्यापकभूतस्वार्थकारुण्यनिवृत्तेर्व्याप्यभूतया प्रेक्षावत्प्रवृत्त्यापि निवर्तितव्यम्।

सुखैकतानं जनयेज्जगत्करुणया सृजन्।
तत्कर्मानुविधायित्वे हीयेतास्य स्वतन्त्रता ॥

न चोपादानादिकसाक्षात्कारिण एव कर्तृत्वमित्यपि नियमः उपादानमुपकरणं चाविदुष एवात्मनो ज्ञानादिषु कर्तृत्वात्, अतः।

असिद्धत्वाद्विरुद्धत्वादनैकान्त्याच्च वर्णितात्।
कार्यत्वहेतोर्जगतो न यथोदितकर्तृता ॥

प्रयोगश्च भवति महीमहीधरादि कार्यं न भवति प्रसिद्धकार्यविलक्षणत्वात् गगनवत् अशक्यदर्शनोपादानोपकरणत्वाद्वा व्यतिरेकेण घटादिवत्, परमाणवो न प्रत्यक्षाः निरतिशयसूक्ष्मद्रव्यत्वात् तथैव घटादिवत्, विमतिविषयः कालो न लोकशून्यः कालत्वात् इदानीन्तनकालवत्, तनुभुवनादि ईश्वरकर्तृकं न भवति कार्यत्वात्तद्वदेव, ईश्वरः कर्ता न भवति प्रयोजनरहितत्वादशरीरत्वाद्वा मुक्तात्मवदिति।

अत्र ब्रूमो न कार्यत्वं क्षित्यादौ शक्यनिह्नवम्।
सभागत्वात् क्रियावत्त्वान्महत्त्वेन विशेषितात् ॥
तादृशादेव मूर्तत्वाद्वाह्यप्रत्यक्षतान्वितात्।
ससामान्यविशेषत्वाद्विद्यादिभ्यो घटादिवत् ॥

न चेदृश एव सन्निवेशः कार्यो नेतर इत्यवयवसन्निवेशविशेषप्रतिनियतं रूपभेदमुदीक्षामहे । यत्तु शक्यक्रियं शक्यज्ञानोपादानोपकरणं च क्रियते इति तदस्तु नाम किं तु ते क्रियाज्ञानशक्ती क्रियाज्ञानाभ्यामेव समधिगमनीये, ते च छित्त्यादिषु यथोक्तसाधनबलसमुपस्थापिते इति न विशेषः प्रसिद्धप्राकारगोपुरादिकार्येभ्यस्तनुभुवनादेः, न चैतावानेव क्रियागोचर इति विषयनियमः कश्चित् क्रियाया दृष्टः, येनेदमशक्यक्रियमध्यवस्येम, सिद्धे च कार्यत्वे तदुपादानादिसाक्षात्करणतदधिष्ठानतत्प्रेरणनिपुणः पुरुषविशेषः सिद्ध्यत्येव, अधिष्ठानं च तत्प्रवृत्त्यनुगुणसंकल्पवदीश्वरसन्निकर्षः क्षेत्रज्ञेनेव स्वशरीरादौ, स च द्रव्यैः संयोगलक्षणस्तद्गुणैस्तु संयुक्तसमवायरूपः, प्रवर्त्तिश्च परमाणूनां परिस्पन्दलक्षणा, धर्माधर्मयोस्तु फलोदयानुकूलतादृशदेशकालादिसहकारिसहितता, ताभ्यां धर्माधर्माभ्यामेव फलं चेतनानधिष्ठितानां सर्वेषामेतेषामचैतन्येनाकिंचित्करत्वात्, न हि चेतनेन वर्धकिनाऽनधिष्ठिता वासी देशकालादिसहकारिशतसमधिगमेऽपि यूपादीन्यापादयितुमलम् बीजाङ्कुरादयस्तु पक्षान्तर्भूता इति तैर्व्यभिचारवचनमनभिज्ञतयैव श्रोत्रियाणाम् । एतेन सुखादिभिर्व्यभिचारोऽपि प्रत्युक्तः, न चोभयवादिसिद्धतामात्रेण क्षेत्रज्ञानामेवेदृशाधिष्ठातृत्वकल्पनमुचितं तेषां सूक्ष्मव्यवहितादिदर्शनाशक्तेर्निश्चितत्वात्, दृष्टानुसारिणी हि सर्वत्र कल्पना न दृष्टविरोधिनी, न चैवमीश्वरस्याशक्तिर्निश्चिता प्रमाणान्तरतस्तत्सिद्धेः, यथोदितप्रमाणबलेन सिद्धान् सांसिद्धिकसर्वार्थदर्शनतत्प्रेरणशक्तिसंपन्न एव सिद्ध्यति

कार्यत्वस्य समर्थकर्तृपूर्वकत्वेन प्रतिबन्धात्। यत्तु परिमितशक्तिज्ञानानैश्वर्याद्यापादनाद्धर्मविशेषविपरीतसाधनत्वमुद्भावितं तदतिस्थवीयः, अप्रयोजकत्वात्तेषां न हि किंचित्क्रियमाणं कर्तुरर्थान्तरविषयमसामर्थ्यं ज्ञानं वा स्वोत्पत्तयेऽपेक्षते स्वसंपादनसमर्थकर्तृमात्राच्चेपात् केवलव्यतिरेकासिद्धेः, तावतैवोपपद्यमाने कार्योदये संबन्धिनोऽकिंचित्करस्यार्थान्तरविषयस्याभावस्य हेतुत्वकल्पनानुपपत्तेः। अपि च किं तदितरसमस्तवस्तुविषयमज्ञानादिव्यापकमुत कतिपयगोचरमिति विवेचनीयं न तावदशेषविषयम् अनुपलब्धेः, न खलु कुम्भकारः कुम्भातिरेकि किमपि न विजानाति। अथ कतिपयविषयं, तदपि न अनियतविषयतया तस्यतस्य व्यभिचारदर्शनात्, न चास्ति किंचिद्यवस्थितं यदविद्यादिमानेव कर्तृतामनुभवति, न च शरीरिणैव कर्त्रा भाव्यम् शरीरग्रहणेनैवानैकान्त्यात्, न खलु शरीरविशिष्टः सन्नेवायमात्मा शरीरमुपादत्ते योगिनो युगपदनेकशरीरग्रहणायोगात् पूर्वदेहपरित्यागेन देहान्तरप्रापककर्मप्रेरितप्राणसहाय एव देहान्तरं प्रविशतीत्युपपादितमात्मचिन्तायाम्। किंचात्मनः शरीरमधितिष्ठतोऽधिष्ठानक्रियाकर्मभूतस्य देहस्याधिष्ठातृदेहानुप्रवेशोऽनुपपन्नः, युगपदेकक्रियायामेकस्य कर्मकर्तृत्वविरोधात्, अधितिष्ठासितदेहसंयोगवत एव तत्प्रवृत्त्यनुगुणप्रयत्नयोगलक्षणमधिष्ठानं दृष्टमिति चेत् अस्त्वेकतत्त्वसंबन्धस्याधिष्ठानानुपपत्तेः प्रेर्यवस्तुसंबन्धिना प्रेरकेण भवितव्यमिति न पुनर्देहसंबन्धेन भाव्यमिति कुतो निर्णयः, इत एव यतोऽन्यदप्यधिष्ठीयमानं मानदण्डादिस्वसंबन्धिनैवाधिष्ठीयते तेनाधिष्ठानक्रिया-

पेक्षिताधिष्ठेयपदार्थसंबन्धमात्रातिरेकेण देहसंबन्धो नामापरो नादर्तव्यः । अस्ति चेश्वरस्यापि जगदुपादानोपकरणैः संबन्ध इत्युक्तमेव । अथ स्वदेहव्यतिरिक्ते वस्तुनि प्रवृत्तिविशेषकरत्वं देहद्वारेणैव, दृष्टं हि दण्डचक्रादिषु करसंयोगादिना कुलालादेः प्रवर्तयितृत्वमित्युच्येत तदपि न अभिध्यानमात्रेणैव परशरीरगतगरनिरसनविसारणदर्शनात्, कथमसति शरीरे परप्रेरणात्मकः संकल्प इति चेत्, किं शरीरं संकल्पयति येन तदभावे न भवेत् करणमिति चेन्न मनस्करणत्वात् किमस्तीश्वरस्य मनः, बाढम् । नन्वेवं विग्रहधर्माधर्मानैश्वर्यादयः साधारणधर्मा प्रादुःष्युः मैवं कार्यत्वाच्चिप्तसमर्थकर्तृमत्त्वाद् दृष्टिस्रैवापास्तत्वात् मनसो नित्येन्द्रियतया देहापगमेऽपि संबन्धाभ्युपगमादनैकान्तिकश्च यावद्धि दृष्टानुगुणं व्याप्त्युपयोगि तावदनुज्ञायते, न चाक्षादेर्मनसाऽप्यचिन्त्यरचनस्यापर्यन्तविस्तारस्य महाभूतभौतिकप्रपञ्चस्य प्रादेशिकशरीरकः किंचिज्ज्ञः पुण्यपापपरवशगतिरलं निर्माणायेत्वपरिमितज्ञानैश्वर्यशक्तिः शरीराद्यनपेक्षः संकल्पादेव सकलभुवननिर्माणक्षमः कर्ता सिद्धः । ईदृशेन कर्त्रा घटादिषु कार्यत्वस्य संबन्धो न दृष्ट इति चेत् अतिगहनगिरितटाधिष्ठानेनातिप्रकृष्टादृष्टचरेन्धननिवहसंबन्धिना हुतवहविशेषेण महानसादौ धूमस्य वा किं संबन्धो दृष्टः येन धूमविशेषदर्शनाद् गिरिशिखरे तथाविधाग्निरनुमीयते, यादृशो धूमो यत्रावगतस्तत्रैव तादृशस्तत्संपादनसमर्थो दृष्टान्तभूमावपरिदृष्टोऽपि सामान्यव्याप्तिबलेन पक्षधर्मतावशात्सिध्यतीति चेत्, तदिदमस्माभिरभिधीयमानं किमिति न

हृदयमधिरोहति भवताम्, इहापि कार्यत्वं समर्थकर्तृपूर्वकत्वेन घटादिषु विदितसंबन्धनियमं क्षित्यादिषु दृश्यमानं स्वसंपादनसमर्थमदृष्टपूर्वमेव बुद्धिमत्कर्तारमुपस्थापयति, यथैव हि देशकालेन्धनपरिमाणादिविशेषानादरेण धूमस्य स्वोदयानुगुणज्ञतावष्टम्भेण संबन्धनियमः तथैवानीश्वरत्वकिंचिज्ज्ञत्वशरीरित्वपुण्यपापपरवशत्वमनुष्यत्वादिविशेषप्रहाणेन कार्यस्य स्वनिर्माणसमर्थबुद्धिमत्कर्तृमात्रेण संबन्धनियमनिश्चय इति न कश्चिद्विशेषः। अपि च विभुद्रव्यसंयोगिनः परिस्पन्दवतश्च सर्वत्र स्पर्शवत्त्वाव्यभिचारेऽपि ज्ञानसुखादिनित्यद्रव्यविशेषगुणानुमितात्मसंयोगिनो मनसः कथमिव स्पर्शरहितत्व, कथं च वायवीयद्रव्यस्य महिमगुणशालिनो नियताधिष्ठानस्पार्शनत्वनियमदर्शनेऽपि त्वगिन्द्रिये तद्विपर्ययः तैजसस्य वा रूपस्पर्शयोरन्यतरस्य वा प्राक्त्वनियमेऽपि रूपोपलम्भसाधनतानुमिततैजसभावस्य चक्षुषो नियमेन तदुभयानुज्ञवाभ्युपगमः। अथ कार्यदर्शनानुमितसद्भावानां तैजसादिभावेऽपि तत्तद्विशेषाणां योग्यानुपलब्धिबाधितत्वात्† तदभ्युपगमेऽनेकनियमभङ्गप्रसङ्गाच्च तथाऽभ्युपगमः।

---

† तदभ्युपगमेऽनेकनियमदर्शनविघातप्रसङ्गाच्च पक्षधर्मतावलम्भ्यार्थविशेषावबोधकानेकश्रुत्यादि मानबाधप्रसङ्गाच्च समर्थकर्तृपूर्वकत्वेन घटादिषु विदितसंबन्धनियमं कार्यत्वं क्षित्यादिषु दृश्यमानं सोत्पादनमदृष्टपूर्वमेव बुद्धिमत्कर्तारमद्वितीयं पुरुषं धौरेयं साधयतीत्यभ्युपगन्तव्यम् तरतमभावापन्नवैचित्र्यवत्तत्तत्कार्येषु का-

हन्त तर्हि प्रकृतविषयेऽपि प्रसञ्जितधर्मविशेषाणामनपलम्भबाधाविशेषादनेकनियमदर्शनविघातप्रसङ्गाच्च तथाऽभ्युपगम इति सर्वं समानमन्यत्राभिनिवेशात्, दृश्यन्ते हि नीतयः,तथा विवादास्पदं परमाण्वादिप्रेक्षावत्प्रेरितं चेष्टते अचेतनत्वात् यदचेतनं तत्तथा यथा तथाविधं कन्दुकादि तथा विवादाध्यासिता वाह्याभ्यन्तरप्रवृत्तयः प्रकृत्युपकरणप्रत्यक्षपूर्विकाः कार्यत्वात्तद्वदेव ।

प्रत्यक्षं तत्प्रमेयत्वात्पदार्थत्वाद्घटादिवत् ।
एकेच्छानुविधायीयमाचैतन्यात्स्वदेहवत् ॥
एकेनाधिष्ठिताः कार्यं कुर्वते सर्वचेतनाः ।
देहसंबन्धसापेक्षकार्यकर्तृत्वात् त्वगादिवत् ॥
एकप्रधानपुरुषं विवादाध्यासितं जगत् ।
चेतनाचेतनात्मत्वादेकराजकदेशवत् ॥

इति भगवद्व्यासमुनिविरचिते सिद्धित्रये ईश्वरसिद्धिः ।

र्यत्वमेव तत्तनुगुणं कर्तारमनुमापयति चेत् महीमहीधराधिरूपजगद्वृतकार्यत्वमपि तदनुगुणकर्तारमनुमापयतीति कैमुत्यसिद्धेऽर्थे व्यर्थोऽयं निरीश्वरमीमांसकस्यात्र दुरभिनिवेशः, दृश्यन्ते ह्यस्मिन्नर्थेऽन्ये च हेतवः त्रैकालिकं कृत्स्नं जगत् तदनुगुणशक्त्यादिगुणगणवदायत्तस्थितिलयकमचिन्त्यविविधविचित्ररचनत्वात् अतिकुशलैकायत्तस्थित्यादिकतयाप्रमितचित्रप्रतिमादिवत् विभूतिपदाभिधेयं कृत्स्नमेपकाधेयविधेयशेषभावं तच्छरीरत्वात् मच्छरीरवत् इति क्वचित् पाठः ।

अथ संवित्सिद्धिरारभ्यते।

एकमेवाद्वितीयं तद्ब्रह्मेत्युपनिषद्वचः।
ब्रह्मणोऽन्यस्य सद्भावं ननु तत्प्रतिषेधति॥
अत्र ब्रूमोऽद्वितीयोक्तौ समासः को विवक्षितः।
किंस्वित्तत्पुरुषः किं वा बहुव्रीहिरथोच्यताम्॥
पूर्वस्मिन्नुत्तरस्तावत्प्राधान्येन विवक्ष्यते।
पदार्थस्तच्च तद्ब्रह्म ततोऽन्यत्सदृशं तु वा॥
तद्विरुद्धमथो वा स्याच्चिष्वप्यन्यं न बाधते।
अन्यत्वे सदृशत्वे वा द्वितीयं सिध्यति ध्रुवम्॥
विरुद्धत्वे द्वितीयेन तृतीयं प्रथमं तु वा।
ब्रह्म प्राप्नोति यस्मात्तद् द्वितीयेन विरुध्यते॥
अतः सप्रथमाः सर्वे तृतीयाद्यार्थराशयः।
द्वितीयेन तथा दृष्ट्वा स्वस्यास्तिष्ठन्त्यबाधिताः॥
ननु नञ् ब्रह्मणोऽन्यस्य सर्वस्यैव निषेधकम्।
द्वितीयग्रहणं यस्मात्सर्वस्यैवोपलक्षणम्॥
नैवं निषेधो न ह्यस्माद् द्वितीयस्यावगम्यते।
ततोऽन्यत्तद्विरुद्धं वा सदृशं वाऽत्र वक्ति सः॥
द्वितीयं यस्य नैवास्ति तद्ब्रह्मेति विवक्षिते।
सत्यादिलक्षणोक्तीनामपलक्षणता भवेत्॥
अद्वितीये द्वितीयार्थनास्तितामात्रगोचरे।
स्वनिष्ठत्वान्नञर्थस्य न स्याद्ब्रह्मपदान्वयः॥
द्वितीयशून्यता तत्र ब्रह्मणो न विशेषणम्।
विशेषणे वा तद्ब्रह्म तृतीयं प्रथमं तु वा॥
प्रसक्तं पूर्ववत्सर्वं बहुव्रीहौ समस्यति।
ब्रह्मणः प्रथमा ये च तृतीयाद्या जगत्त्रये॥

ब्रह्म प्रत्यद्वितीयत्वात्स्वस्थास्तिष्ठन्त्यबाधिताः ।
किंच तत्र बहुव्रीहौ समासे संश्रिते सति ॥
वत्यर्थस्य नञर्थस्य न पदार्थान्तरान्वयः ।
सत्यार्थान्तरसंबन्धे षष्ठी यस्येति युज्यते ॥
द्वितीयवस्तुनास्तित्वं न ब्रह्म न विशेषणम् ।
असत्त्वान्न ह्यसद्ब्रह्म भवेन्नापि विशेषणम् ॥
तस्मात्पञ्चसद्भावो नाद्वैतश्रुतिबाधितः ।
स्वप्रमाणबलात्सिद्धः श्रुत्या चाप्यनुमोदितः ॥
तेनाद्वितीयं ब्रह्मेति श्रुतेरर्थोऽयमुच्यते ।
द्वितीयगणनायोग्यो नासौदस्ति भविष्यति ॥
समो वाऽभ्यधिको वाऽस्य योद्वितीयस्तु गण्यते ।
यतोऽस्य विभवव्यूहकलामात्रमिदं जगत् ॥
द्वितीयवागास्पदतां प्रतिपद्येत तत्कथम् ।
यथा चोलनृपः सम्राड्द्वितीयोऽद्य भूतले ॥
इति तत्तुल्यनृपतिनिवारणपरं वचः ।
न तु तद्भृत्यतत्पुत्रकलत्रादिनिषेधकम् ॥
तथा सुरासुरनरब्रह्मब्रह्माण्डकोटयः ।
क्लेशकर्मविपाकाद्यैरस्पृष्टस्याखिलेशितुः ॥
ज्ञानादिषाड्गुण्यनिधेरचिन्त्यविभवस्य ताः ।
विष्णोर्विभूतिमहिमसमुद्रद्रप्सविप्लुषः ॥
कः खल्वङ्गुलिभङ्गेन समुद्रान् सप्तसंख्यया ।
गणयन् गणयेदूर्मिफेनबुद्बुदविप्लुषः ॥
यद्येक एव सविता न द्वितीयो नभःस्थले ।
इत्युक्त्या न हि सावित्रा निषिध्यन्तेऽत्र रश्मयः ॥
यथा प्रधानसंख्येयः संख्यायां नैव गण्यते ।
संख्या पञ्चक [illegible] संख्येयान्तरवर्णने ॥

तथा, पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि।
इति ब्रुवञ्जगत्सर्वमित्थंभावे न्यवेशयत्।
तथा,
एतावानस्य महिमा ततोज्यायस्तरो हि सः॥
यद्बाह्यन्न विजानाति सभूमोदरमन्तरम्।
कुरुतेऽस्य भयं व्यक्तमित्यादिश्रुतयः पराः॥
मेरोरिवाणुर्यस्येदं ब्रह्माण्डमखिलं जगत्॥
इत्यादिकाः समस्तस्य तदित्थंभावतापराः॥
वाचाऽऽरम्भणमात्रं तु जगत्स्थावरजङ्गमम्।
विकारजातं कूटस्थं मूलकारणमेव सत्॥
अनन्यत्कारणात्कार्यं पावकाद्विस्फुलिङ्गवत्।
मृत्तिकालोहबीजादिनानादृष्टान्तविस्तरैः॥
नाशकद्दग्धुमनलस्तृणं मज्जयितुं जलम्।
न वायुश्चलितुं शक्तस्तच्छक्त्याप्यायनादृते॥
एकप्रधानविज्ञानाद्विज्ञातमखिलं भवेत्।
इत्यादिवेदवचनतन्मूलाप्तागमैरपि॥
ब्रह्मोत्मनात्मलाभोऽयं प्रपञ्चश्चिदचिन्मयः।
इति प्रमीयते ब्राह्मी विभूतिर्न निषिध्यते॥
तन्निषेधे समस्तस्य मिथ्यात्वाल्लोकवेदयोः।
व्यवहारास्तु लुप्येरँस्तथा स्याद्ब्रह्मधीरपि॥
व्यावहारिकसत्यत्वान्मृषात्वेऽप्यविरुद्धता।
प्रत्यक्षादेरितिं मतं प्रागेव समदूदुषम्॥
अतश्चोपनिषज्ज्ञातब्रह्माद्वैतधिया जगत्।
न बाध्यते विभूतित्वाद्ब्रह्मणश्चेत्यवस्थितम्॥
ननु सत्त्वे प्रपञ्चस्य नास्तीति प्रत्ययः कथम्।
असत्त्वे वा कथं तस्मिन्नस्तीति प्रत्ययो भवेत्॥

सदसत्त्वं तथैकस्य विरुद्धत्वादसंभवि ।
सदसत्प्रत्ययप्राप्तविरुद्धद्वन्द्वसंगमे ॥
तयोरन्यतरार्थस्य निश्चयाभावहेतुतः ।
सदसत्त्वं प्रपञ्चस्य जैनास्तु प्रतिजानते ॥
सत्त्वप्राप्तिं पुरस्कृत्य नास्तीति प्रत्ययोदयात् ।
सदा सत्त्वं प्रपञ्चस्य सांख्यास्तु प्रतिपेदिरे ॥
सदसत्प्रत्ययप्राप्तविरुद्धद्वन्द्वसंकटे ।
विरोधपरिहारार्थं सत्त्वासत्त्वांशभङ्गतः ॥
सदसद्ग्रामनिर्वाच्यं प्रपञ्चं केचिदूचिरे ।
सत्त्वासत्त्वे विभागेन देशकालादिभेदतः ॥
घटादेरिति मन्वाना व्यवस्थामपरे जगुः ।
तदेवंवादिसंमर्दात्संशये समुपस्थिते ॥
निर्णयः क्रियते तत्र मीमांसकमतेन तु ।
घटस्वरूपे नास्तित्वमस्तित्वं यद्यबूबुधत् ॥
स्यादेव युगपत्सत्त्वमसत्त्वं च घटादिषु ।
इदानीमिदमत्रास्ति नास्तीत्येवंविधा यतः ॥
देशकालदशाभेदादस्ति नास्तीति नो धियः ।
अतोदेशादिभेदेन सदसत्त्वं घटादिषु ॥
व्यवस्थितं निरस्तत्वाद्वादस्येह न संभवः ।
ननु देशादिसंबन्धः सत एवोपपद्यते ॥
न देशकालसंबन्धादसतः सत्त्वमिष्यते ।
संबन्धो ह्याश्रयस्तस्मात्सतः सत्त्वं सदा भवेत् ॥
असतः कारकैः सत्त्वं जन्मनेत्यतिदुर्घटम् ।
आद्यन्तवान् प्रपञ्चोऽतः सत्कृत्यान्तर्निवेक्ष्यते ॥

उक्तं च,

आदावन्ते च यन्नास्ति नास्ति मध्येऽपि तत्तथा।

अतोनिश्चितसद्भावः सदा सद्ब्रह्मयुपेयताम् ॥
असतः सर्वदा सत्त्वं जन्यायोगात्खपुष्पवत्।
असत्त्वे न विशेषोऽस्ति प्रागत्यन्तासतोरिह ॥
श्वेतकेतुमुपादाय तत्त्वमित्यपि यच्छ्रुतम् ।
षष्ठप्रपाठके तस्य कुतो मुख्यार्थसंभवः ॥
कार्पण्यशोकदुःखार्तश्चेतनस्त्वंपदोदितः ।
सर्वज्ञः सत्यसंकल्पो निःसीमासुखसागरः ॥
तत्पदार्थस्तयोरैक्यं तेजस्तिमिरवत्कथम् ।
त्वमर्थस्थे तटस्थेवा———————————
गुणे तत्त्वंपदश्रुत्योरैकार्थ्यं दूरवारितम् ॥
अज्ञत्वसर्ववेदित्वदुःखित्वसुखितादिके ।
विशेषणे वा चिद्धातोरथवा ऽप्युपलक्षणे ॥
विरुद्धगुणसंक्रान्तेर्भेदः स्यात्त्वंतदर्थयोः ।
वाच्यैकदेशभङ्गेन चिदेकव्यक्तिनिष्ठता ॥
सोऽयं गौरितिवत्तत्त्वंपदयोरित्यपेशलम् ।
देशकालदशभेदादेकस्मिन्नपि धर्मिणि ।
विरुद्धद्वन्द्वसंक्रान्तेः सोऽयं गौरिति युज्यते ॥
स्वप्रकाशस्य चिद्धातोर्विरुद्धद्वन्द्वसंगतौ ॥
न व्यवस्थापकं किंचिद्देशकालदशादिके ।
निधूतनिखिलद्वन्द्वस्वप्रकाशे चिदात्मनि ॥
हैतानर्थभ्रमाभावाच्छास्त्रं निर्विषयं भवेत् ।
एतेन सत्यकामत्वं जगत्कारणतादयः ॥
———————————शोकमोहादयः पुनः।
अविद्योपाधिके जीवे विनाशेनेति यन्मतम् ।
क्षुद्रब्रह्मविदामेतन्मतं प्रागेव दूषितम् ॥
चित्स्वरूपे विशिष्टे वा मायाविद्याद्युपाधयः ।

पूर्वस्मिन् सर्वसांकर्यं परजीवाविभागतः ॥
उत्तरस्मिन्नपि तथा विशिष्टमपि चिद्यदि ।
चित्स्वरूपं हि निर्भेदं मायाऽविद्याद्युपाधिभिः ॥
विभिन्नमिव विभ्रान्तं———————————
तटस्था वस्थिता धर्माः स्वरूपं न स्पृशन्ति किम् ।
न हि दण्डिशिरश्छेदाद्देवदत्तो न हिंसितः ॥
अचिदंशव्यपोहेन चिदेकपरिशेषता ।
अतस्त्वमसीत्यादेरर्थ इत्यपसुन्दरम् ॥
अब्रह्मानात्मताभावे प्रत्यक्चित्परिशिष्यते ।
तत्त्वंपदद्वयं जीवपरताद्रात्म्यगोचरम् ॥
तन्मुख्यवृत्तितादात्म्यमपि वस्तुद्वयाश्रयम् ।
भेदाभेदविकल्पस्तु यस्त्वया परिचोदितः ॥
अभेदाभेदिनोऽसत्ये बन्धे सति निरर्थकः ।
अभेदो भेदमर्दीति स्वाश्रयीभूतवस्तुनोः ॥
भेदः परस्परानात्म्यं भावानामेवमेतयोः
स्वरूपमभ्युपेत्यैव भेदाभेदविकल्पयोः ॥
———————तेन वाक् बाधाविरोधेन निगृह्यसे ।
भिन्नाभिन्नत्वसंबन्धसदसत्त्वविकल्पनम् ॥
प्रत्यक्षानुभवापास्तं केवलं कण्ठशोषणम् ।
नीले नीलमतिर्यादृगुत्पले नीलधीर्हि सा ॥
नीलमुत्पलमेवेदमिति साक्षाच्चकास्ति नः ।
यथा विदितसंयोगसंबन्धेऽप्यक्षगोचरे ॥
भेदाभेदादिदुस्तर्कविकल्पाधानविभ्रमः ।
तद्वत्तादात्म्यसंबन्धे श्रुतिप्रत्यक्षमूलके ॥
श्रुतिदण्डेन दुस्तर्कविकल्पभ्रमवारणम् ।
निर्दोषाऽपौरुषेयी च श्रुतिरत्यर्थमादरात् ॥

असक्तत्त्वमित्याह तादात्म्यं ब्रह्मजीवयोः।
ब्रह्मानन्दं हृदान्तस्थो मुक्तात्मा सुखमेधते।
फले च फलिनोऽभावान्मोक्षस्यापुरुषार्थता॥
एकशेषे हि चिद्वातोः कस्य मोक्षः फलं भवेत्।
किंच प्रपञ्चरूपेण का नु संविद्विवर्तते॥
न तावद्घटधीस्तस्यामसत्यामपि दर्शनात्।
न हि तस्यामजातायां नष्टायां वा खिलं जगत्॥
नास्तीति शक्यते वक्तुं मुक्तौ प्रत्यक्षबाधनात्।
नाप्यन्यसंवित्तन्नाशेऽप्यन्येषामुपलम्भनात्॥
ननु सविदभिन्नैका न तस्यामस्ति भेदधीः।
घटादयोऽपि भिद्यन्ते न तु सा चित्प्रकाशनात्॥
घटधीः पटसंवित्तिसमये नावभाति चेत्।
नैवं घटो हि नाभाति सा स्फुरत्येव तु स्फुटम्॥
घटव्यावृत्तसंवित्तिरथ न स्फुरतीति चेत्।
तद्व्यावृत्तिपदेनापि किं सैवोक्ताऽथवेतरत्॥
सैव चेद्भासतेऽन्यच्चेन्न ब्रूमस्तस्य भासनम्।
किंचास्याः स्वप्रकाशया नीरूपाया न हि स्वतः॥
ऋते विषयनानात्वान्नानात्वावग्रहभ्रमः।
न वस्तु वस्तुधर्मो वा न प्रत्यक्षो न लैङ्गिकः॥
घटादिवेद्यभेदोऽपि केवलं भ्रमलक्षणः।
यदा तदा तदायत्तोधीभेदादग्रहोदयः॥
कुतः कुतस्तरां तस्य परमार्थत्वसंभवः।
किंच स्वयंप्रकाशस्य स्वतो वा परतोऽपि वा॥
प्रागभावादिसिद्धिः स्यात्स्वतस्तावन्न युज्यते।
स्वस्मिन् सति विरुद्धत्वाद्भावस्यानवस्थितेः॥
स्वनिमित्तप्रकाशस्य [illegible]।

अनन्यगोचरत्वेन चितो न परतोऽपि च ॥
किंच वेद्यस्य भेदादेर्न चिद्धर्मत्वसंभवः ।
रूपादिवदतः संविदद्वितीया स्वयंप्रभा ॥
अतस्तद्वेदमाश्रित्य यद्विकल्पादि जल्पितम् ॥
तदविद्याविलासोऽयमिति ब्रह्मविदोविदुः ।
हन्त ब्रह्मोपदेशोऽयं श्रद्दधानेषु शोभते ।
वयमश्रद्दधानाः स्मो ये युक्तिं प्रार्थयामहे ॥
प्रति प्रमातृविषयं परस्परविलक्षणाः ।
अपरोक्षं प्रकाशन्ते सुखदुःखादिवद्वियः ॥
संबन्धिन्यङ्गभेदस्य संयोगेच्छादिकस्य नः ।
न हि भेदः स्वतो नास्ति नाप्रत्यक्षश्च संमतः ॥
यदि सर्वगता नित्या संविदेवाभ्युपेयते ।
ततः सर्वं सदा भायान्न वा किंचित्कदाचन ॥
तदानीं न हि वेद्यस्य सन्निधीतरकारिता ।
व्यवस्था घटते वित्तेर्व्योमवद्वैभवाश्रयात् ॥
नापि कारणभेदेन नित्यायास्तदभावतः ।
न च स्वरूपनात्वात्तदेकत्वपरिग्रहात् ॥
ततश्च बधिरान्धादेः शब्दादिग्रहणं भवेत् ।
गुरुशिष्यादिभेदश्च निर्निमित्तः प्रसज्यते ॥
ननु नः संविदो भिन्नं सर्वं नाम न किंचन ।
अतः सर्वं सदा भावादित्यकाण्डे न युज्यते ।
इदमाख्याविभोः किं नु नीलादिर्न प्रकाशते ॥
प्रकाशमानो नीलादिः संविदो वा न भिद्यते ।
आदौ प्रतीतिसुभगो निर्वाहो लोकवेदयोः ॥
यतः पदपदार्थादि न किंचिदवभासते ।
द्वितीये संविदो द्वैतं व्याहन्येत समीहितम् ॥

यद्ययं विविधाकारप्रपञ्चः संविदात्मकः।
साऽपि संवित्तदात्मेति यतो नाना प्रसज्यते ॥
न चाविद्याविलासत्वाद् भेदाभेदानिरूपणात्।
सा हि न्यायानलस्पृष्टाजातुषाभरणायते ॥
तथा हि यद्यविद्येयं विद्याऽभावात्मिकेष्यते।
निरूप्याख्यस्वभावत्वात्सा न किंचिन्नियच्छति ॥
अर्थान्तरमविद्या चेत्साध्वी भेदानिरूपणा।
अर्थानर्थान्तरत्वादिविकल्पोऽस्या न युज्यते ॥
विद्यातोऽर्थान्तरं चासाविति सुव्याहृतं वचः।
अथार्थान्तरभावोऽपि तस्यास्ते भ्रान्तिकल्पितः ॥
हन्तैवं सत्यविद्यैव विद्या स्यात्परमार्थतः।
किंच शुद्धा जड़ा संविदविद्येयं तु नेदृशी ॥
तत्केन हेतुना सेयमन्यैव न निरूप्यते।
अपि चेयमविद्या ते यदभावादिरूपिणी ॥
सा विद्या किन्तु संवित्तिर्वेद्यं वा वेदिताऽथ वा।
वेद्यत्वे वेदितृत्वे च नाद्याभ्यां निवर्तनम्।
न हि ज्ञानाहृतेऽज्ञानमन्यतस्ते निवर्तते ॥
संविदेवेति चेत्तस्या ननु भावादसम्भवः।
किंचेयं तद्विरुद्धा वा न तस्याः क्वापि सम्भवः ॥
यतोऽखिलं जगद्ग्राह्यं विद्ययैवाद्वितीयया।
अभावोऽन्यो विरुद्धो वा संविदोऽपि यदीष्यते ॥
तदानीं संविदद्वैतप्रतिज्ञां दूरतस्त्यज।
किं चासौ कस्य जीवस्य को जीवो यस्य सेति चेत्॥
नन्वेवमसमाधानमन्योन्याश्रयणं भवेत्।
न ते जीवादविद्या स्यान्न च जीवस्तया विना ॥
न बीजाङ्कुरतुल्यत्वं जीवोत्पत्तेरयोगतः।

ब्रह्मणश्चेन्न सर्वज्ञं कथं तद्ब्रह्मभीति ते ॥
अविद्याकृतदेहात्मप्रत्ययाधीनता न ते ।
ब्रह्मसर्वज्ञभावस्य तत्त्वाभाविकताश्रुतेः ॥
भेदावभासगर्भत्वाद्दृष्या सर्वज्ञता वृथा ।
तत एवावृषा कस्मान्न स्याच्छब्दान्तरादिवत् ॥
यथा शब्दान्तराभ्यासंसंख्याद्याः शास्त्रभेदकाः ।
भेदावभासगर्भाश्च यथार्थास्तादृशी न किम् ॥
सर्वज्ञे नित्यमुक्तेऽपि यद्यज्ञानस्य संभवः ।
तेजसीव तमस्तस्मान्न तिवर्तेत केनचित् ॥
सर्वज्ञत्वादिवचनप्रामाण्यं व्यावहारिकम् ।
तात्त्विकं तु प्रमाणत्वमद्वैतवचसामिति ।
नियामकं न पश्यामो निर्बन्धात्तावकादृते ।
आश्रयप्रतियोगित्वे परस्परविरोधिनी ॥
कथं वैकरसं ब्रह्म सदिति प्रतिपद्यते ।
प्रत्यक्षेणाश्रयो ब्रह्मरूपेण प्रतियोगि चेत् ॥
रूपभेदः कुतस्त्योऽयं यद्यविद्याप्रसादजः ।
ननु सापि तदायत्तेत्यन्योन्याश्रयणं पुनः ॥
अवस्तुत्वादविद्यायाः——————————
वस्तुनोदूषणत्वेन त्वया क्वेदन्निरूपितम् ॥
*उत्कारादोषोऽन्योन्यमाश्रयः ।
न वस्तुत्वादवस्तुत्वादित्ययो नेदमुत्तरम् ॥
किंचाविद्या न चेद्य——————————
——————पुष्पादिव्यवहारवदीर्च्यते ।
नाप्यवस्त्विति चो——————————
——————समस्तेन नजा वस्त्विति चेत्——

* नष्टं पाठान्तरं मन्ये ।

समस्तेन नञा वस्तु प्रथमं यन्निषिध्यते।
प्रतिप्रसोतव्यस्तेन पुनस्तदिति वस्तुता॥
अतो न वस्तुना———————————
न कश्चकास्तीति विवक्षितार्था†स्तजातुचित्
किंच प्रपञ्चनिर्वाहजननी येयमाश्रिता॥
अविद्या सा किमेकैव नैका वा यदिदं वद॥
तदाश्रयश्च संसारी तथैको नैक एव वा।
सा चेदेका ततः सैका शुकस्य ब्रह्मविद्यया॥
पूर्वमेव निरस्तेति व्यर्थस्ते मुक्तये श्रमः।
स्यान्मतं नैव ते सन्ति वामदेवशुकादयः॥
यद्विद्यया निरस्तत्वान्नाद्या विद्येति चोद्यते।
मुक्तामुक्तादिभेदो हि कल्पितो मदविद्यया॥
दृश्यत्वान्मामकस्वप्नदृश्यभेदप्रपञ्चवत्।
यत्पुनर्ब्रह्मविद्यातस्तेषां मुक्तिरभूदिति॥
वाक्यं तत्स्वाप्नमित्युक्तियुक्ता प्रत्यूहतामिति।
नन्वीदृशानुमानेन स्वाविद्यापरिकल्पितम्॥
प्रपञ्चं साधयत्यन्यः कथं प्रत्युच्यते त्वया।
त्वदविद्यानिमित्तत्वे यो हेतुस्ते विवक्षितः॥
स एव हेतुस्तस्यापि भवेत्सर्वज्ञसिद्धिवत्।
इत्यन्योऽन्यविरुद्धोक्तिव्याहते भवतां मते॥
सुखमस्तीति यत्किंचित्प्रलपन्निव लक्ष्यसे।
यथा च स्वाप्नमित्युक्तिसदृशी तद्विमुक्तिगीः॥
तथैव भवतोऽपीति व्यर्थो मोक्षाय ते श्रमः।
यथा तेषामभूतैव पुरस्तादात्मविद्यया॥
मुक्तिभूतोच्यते तद्वत्परस्तादात्मविद्यया।

† पाठान्तरं किंचिदस्तीति

अभाविन्येव सामर्थ्याभाविनीत्यपदिश्यताम् ।
सन्ति च स्वप्नदृष्टानि दृष्टान्तवचनानि ते ॥
ननु नेदमनिष्टं मे यन्मुक्तिर्न भविष्यति ।
आत्मनो नित्यमुक्तत्वान्नित्यसिद्धैव सा यतः ।
तदिदं शान्तिकर्मादौ वेतालावाहनं भवेत् ॥
येनैवं सुतरां व्यर्थो ब्रह्मविद्यार्जनश्रमः ।
अविद्याप्रतिबद्धत्वादथ सा नित्यसत्यपि ॥
असतो वेति तद्यक्तिर्विद्याफलमुपेयते ।
हस्तस्थमेव हेमादि विस्मृतं दृश्यते यथा ॥
यथा तदेव हस्तस्थमवगम्योपशाम्यति ।
तथैव नित्यमुक्तात्मस्वरूपानवबोधतः ॥
संसारिणस्तथा भावो व्यज्यते ब्रह्मविद्यया ।
हन्त केयमभिव्यक्तिर्यां विद्याफलमिष्यते ॥
स्वप्रकाशस्य चिद्धातोर्या स्वरूपपदे स्थिता ।
संवित्किं सैव किं वाऽहं ब्रह्मास्मीतीति कीदृशी ।
यदि स्वरूपसंवित्सा नित्यैवेति न तत्फलम् ॥
अथ ब्रह्माहमस्मीति संवित्तिर्व्यक्तिरिष्यते ।
ननु ते ब्रह्मविद्या सा सैव तस्याः फलं कथम् ॥
किंच सा तत्त्वमस्यादिवाक्यजन्या भवन्मते ।
उत्पत्तिमत्यनित्येति मुक्तस्यापि भयं भवेत् ॥
अपि च व्यवहारज्ञाः सति एुष्कलकारणे ।
कार्यं न जायते येन तमाहुः प्रतिबन्धकम् ।
इह किं तदुत्पत्तुमुपक्रान्तं स्वहेतुतः ॥
अविद्याप्रतिबद्धत्वादुत्पत्तिं न प्रपद्यते ।
न मुक्तिर्नित्यसिद्धत्वान्न ब्रह्माऽस्मीति धीरपि ॥
न हि ब्रह्माहमस्मीति संवित्पुष्कलकारणम् ।

संसारिणस्तदाऽस्तीति कथं सा प्रतिबध्यते ॥
यतः सा कारणाभावादिदानीं नोपजायते।
न पुनः प्रतिबद्धत्वादस्याने तेन तद्वचः।
किंचैको जीव इत्येतद्वस्तुस्थित्या न युज्यते ॥
अविद्या--तत्समाश्लेष--जीवत्वादिमृषा हि ते।
प्रातिभासिकमेकत्वं प्रतिभासप्रबाधितम् ॥
यतो नः प्रतिभासन्ते संसरन्तः सहस्रशः।
आसंसारसमुच्छेदं व्यवहाराश्च तत्कृताः ॥
अबाधिताः प्रतीयन्ते स्वप्नदृष्टविलक्षणाः।
तेन यौक्तिकमेकत्वमपि युक्तिपराहतम्।
प्रवृत्तिभेदानुमिता विरुद्धमिति दृष्टयः ॥
तत्तत्त्वात्मवदन्येऽपि देहिनोऽशक्यनिह्नवाः।
यथाऽनुमेयाद्दक्प्रादेरनुमानाविलक्षणाः ॥
प्रत्यक्षं ते तथाऽन्येभ्यो जीवेभ्यो न पृथक् कथम्।
न चेच्चेष्टाविशेषेण परो बोद्धाऽनुमीयते ॥
व्यवहारोऽवलुप्येत सर्वोलौकिकवैदिकः।
न चौपाधिकभेदेन मेयमात्रविभागधीः।
स्वशरीरेऽपि तत्राग्रेः शिरःपाण्यादिभेदतः ॥
तथा तत्र शिरःपाणिपादादौ वेदनोदये।
अनुसंधानमेकत्वे तथा सर्वत्र ते भवेत् ॥
प्रायणान्तरक्लेशात्प्रसूतिव्यसनादपि।
चिरातिदृष्टाः प्राग्जन्मभोगा न स्मृतिगोचराः ॥

युगपज्जायमानेषु
आश्रयाश्रङ्करस्तत्र कथमैकार्थ्यविभ्रमः।
न च प्रातिस्विकाविद्याकल्पितस्वस्वदृश्यकैः ॥
जीवैरनेकैरप्येषा लोकयात्रोपपद्यते।

परवार्तानभिज्ञास्ते स्वस्वस्वप्नैकदर्शिनः ॥
कथं प्रवर्तयेयुस्तां सङ्गादैकनिबन्धनाम् ।
किंच स्वयंप्रकाशत्वविभुत्वैकत्वनित्यताः ॥
त्वदभ्युपेता बाधेरन् संविदस्ते द्वितीयताम् ।
संविदेव न ते धर्माः सिद्धायामपि संविदि ॥
विवाददर्शनात्तेषु तद्रूपाणां च भेदतः ।
न च ते भ्रान्तिसिद्धास्ते येनाद्वैताविरोधिनः ॥
तत्त्वावेदकवेदान्तवाक्यसिद्धा हि ते गुणाः ।
आनन्दस्वप्रकाशत्वनित्यत्वमहिमादयः ॥
ब्रह्मस्वरूपमेवेष्टं तवापीदं विविच्यताम् ।
ब्रह्मेति यावन्निर्दिष्टं तन्मात्रं किं सुखादयः ॥
अथवा तस्य ते यद्वा त एव ब्रह्मसंज्ञिनः ।
आद्ये तत्तत्पदात्मानवैयर्थ्यं वेदलोकयोः ॥
पूर्वोक्तनीत्या भेदश्च जगज्जन्मादिकारणम् ।
अभ्युपेत्यैव हि ब्रह्म विवादास्तेषु वादिनाम् ॥
द्वितीये सैव तैरेव ब्रह्मणः सद्वितीयता ।
तृतीये ब्रह्म भिद्येत तन्मात्रत्वात्पदेपदे ॥
तत्समूहोऽथवा ब्रह्म तरुवृन्दविनाशवत् ।
प्रकर्षश्च प्रकाशश्च भिन्नावेवार्कवर्तिनौ ।
तेन न क्वापि वाक्यार्थो विभागोऽस्ति निदर्शनम् ॥
जाड्यदुःखादपोहेन यदेकत्वेन वर्तिता ।
ज्ञानानन्दादिशब्दानां न सतः सद्वितीयता ॥
अपोहाः किं न सन्त्येव सन्तो वा नोभयेऽपि वा ।
सत्वसत्सद्वितीयः स्याज्जडादात्मकतेतरे ॥
सदसद्व्यतिरेकोक्तिः पूर्वमेव पराकृता ।
तथात्वे च घटादिभ्यो ब्रह्मापि न विशिष्यते ।

किंचापोह्य जडत्वादि विरुद्धार्थासमर्पणे ॥
नैव तत्तदपोह्येत तदेकार्थैः पदैरिव ।
प्रतियोगिनि दृश्ये तु याऽभावान्तरमावधीः ॥
सैवाभाव इतीहापि सन्निस्ते सहितीयता ।
भूतभौतिकभेदानां सदसद्व्यतिरेकिता ॥
कुतोऽवसीयते किन्नु प्रत्यक्षादेरुतागमात् ।
प्रत्यक्षादीनि मानानि स्वंस्वमर्थं यथायथम् ॥
व्यवच्छिन्दन्ति जायन्ते इति यावत्स्वसाक्षिकम् ।
यथाग्रतःस्थिते नीले नीलिमान्यकथा न धीः ॥
एकाकारा न हि तथा स्फटिके धवले मतिः ।
क्षीरे मधुरधीर्याद्दृक् नैव निम्बकषायधीः ॥
व्यवहाराश्च नियताः सर्वे लौकिकवैदिकाः ।
सत्यं प्रतीतिरस्त्यस्या मूलं नास्तीति चेन्न तत् ॥
सा चेदस्ति तया मूलं कल्प्यतां कार्यभूतया ।
कृत्स्नश्चेन्द्रियलिङ्गादि तद्भावानुविधानतः ॥
यौगपद्यक्रमायोगाद्यावच्छेदविधानयोः ।
ऐक्यायोगाच्च भेदो न प्रत्यक्ष इति यो भ्रमः ॥
भेदेतरेतराभावा द्वीवेगाग्रहणेन सः ।
स्वरूपमेव भावानां प्रत्यक्षेण परिस्फुरत् ॥
भेदव्याहारहेतुः स्यात्प्रतियोगिव्यपेक्षया ।
यथा तन्मात्राधीनानां नास्तिव्याहारसाधनी ॥
ह्रस्वदीर्घत्वभेदा वा यदैकत्र षडङ्गुले ।
एवंव्यवस्थितानेकप्रकाराकारतवत्तया ॥
प्रत्यक्षस्य प्रपञ्चस्य तद्भावोऽशक्यनिह्नवः ।
आगमः कार्यनिष्ठत्वादीदृशेऽर्थे न तु प्रमा ॥
प्रामाण्येऽप्यन्वयायोग्यपदार्थत्वान्न बोधकः ।

नासत्प्रतीतेर्बाधाच्च न सदित्यपि यन्न तत् ॥
प्रतीतेरेव सत्किन्न बाधान्नासत्कुतोजगत् ।
तस्मादविद्ययैवेयमविद्या भवताऽऽश्रिता ॥
किंच भेदप्रपञ्चस्य धर्मो मिथ्यात्वलक्षणः ।
मिथ्या वा परमार्थो वा नाद्यः कल्पोऽयमञ्जसा ॥
असतोऽर्थान्तरेभ्यश्च व्यवच्छिन्दन्ति भान्ति नः ।
तथा हीह घटोऽस्तीति यं यं धीरुपजायते ॥
सा तदा तस्य नाभावं पटत्वं वाऽनुमन्यते ।
नन्वस्तीति यदुक्तं किं तन्मात्रं घट इत्यपि ॥
अर्थान्तरं वा तन्मात्रे सदद्वैतं प्रसज्यते ।
अर्थान्तरत्वे सिद्धं तत्सदसद्भ्यां विलक्षणम् ॥
यदेवमस्ति ब्रह्मेति ब्रह्मौपनिषदं मतम् ।
घटवत्सदसत्त्वाभ्यामनिर्वाच्यं तवापतेत् ।
आनन्दसत्यज्ञानादिनिर्देशैरेव वैदिकैः ।
ब्रह्मणोऽप्यतथाभावस्त्वयैवैवं समर्थितः ॥
सदसद्व्यतिरेकोक्तिः प्रपञ्चस्य च हीयते ।
यदयथा किंचिदुच्येत तत्सर्वस्य तथा भवेत् ॥
तस्मादस्तीति संवित्तिर्जायमाना घटादिषु ।
तत्तत्पदार्थसंस्थानपारमार्थ्यावबोधिनी ॥
संजातीयविजातीयव्यवच्छेदनिबन्धनैः ।
स्वैः स्वैर्व्यवस्थितैरूपैः पदार्थानां तु या स्थितिः ॥
सा सत्ता न स्वतन्त्राऽन्या तत्राद्वैतकथा कथम् ।
न च नानाविधाकारप्रतीतिः शक्यनिह्नवा ॥
सर्वाण्येव प्रमाणानि स्वंस्वमर्थं यथोदितम् ।
तन्मिथ्यात्वे प्रपञ्चस्य सत्यत्वं दुरपन्हवम् ॥
पारमार्थ्येऽपि तेनैव तवाद्वैतं विहन्यते ॥

न वेद्यं वित्तिधर्मः स्यादिति यत्प्रागुदीरितम् ।
तेनापि साधितं किंचित्संविदोऽस्ति न वा त्वया ।
अस्ति चेत्प्रत्यक्षबाधः स्यान्न चेत्ते विफलः श्रमः ।
अतः स्वरसविस्पष्टदृष्टभेदास्तु संविदः ।
यथा रथादिभिर्वाह्यैर्नैक्यं याति घटादिभिः ॥
सहोपलम्भनियमो न ह्यल्वेकैकसंविदा ।
न चेदस्ति ससामान्यं सर्वं संवेदनास्पदम् ॥
सहोपलम्भनियमान्नान्योऽर्थः संविदो भवेत् ।
यदेतदपराधीनस्वप्रकाशं तदेव हि ॥
स्वयंप्रकाशताशब्दमिति वृद्धाः प्रचक्षते ।
यस्मिन्नभासमाने हि यो नामार्थो न भासते ॥
नासा*वर्थान्तरस्तस्मान्मिथ्येन्दुरिव चन्द्रतः ।
अभासमाने विज्ञाने न चात्मार्थावभासनम् ॥
इति संविद्विवर्तत्वं प्रपञ्चः स्फुटमञ्चति ।
मैवं परिभवः प्रत्यक्षेणाबलीयसा ॥
संरभ्यमाणभेदास्तेनानुमानानुवर्तिनः ।
तथा ह्यहमहं वेद्मीत्यन्योन्यानात्मना स्फुटम् ॥
वयं साक्षाच्चकास्तीति सर्वेषामात्मसाक्षिकम् ।
प्रत्यक्षप्रतिपक्षं च नानुमानं प्रवर्तते ।
न हि वन्हेरनुष्णत्वं द्रव्यत्वादनुमीयते ॥
किञ्च हेतुर्विरुद्धोऽयं सहभावो द्वयोर्यतः——

——स्वात्मना सहभासते ।
नीलाद्युपप्लवापेतस्वच्छचिन्मात्रसंततिः ॥
स्वापादौ भासते नैवमर्थः संवेदनात्पृथक् ।

* न चादोऽर्थान्तरं तस्मादिति पाठः समुचितः

तेन संवेदनं सत्यं संवेद्योऽर्थः स्वनन्निति ॥
तदेतदपरामृष्टस्ववाग्वाधस्य जल्पितम् ।
सहोपलक्षनियमो येनैवं सति हीयते ॥
यस्माहते यदा भाति भाति यस्माहतेऽपि तत् ।
घटाहतेऽपि निर्भातः पटादिव घटःस्वयम् ॥
न क्वाप्यतः परमहृश्यतकोश शेष-
स्तच्छेषपूरणकृतिः परिहासहेतुः ।
ज्ञातव्यमन्यदपि तैर्निरणायि सव्य-
ग्रन्थान्तरेष्विति न किंचिदिहास्त्विचिन्त्यम् ॥

सन्तु सहायाः पूर्वाचार्याः स्वानुग-
तानां मादृशानां पृथग्जनानामपि ।
इति भृशमभ्यर्थयते ।
स्वामि राममिश्रशास्त्री,
सं० १९५७ फा० शु० प्रतिपदि बुधे.